अर्वाचीनसंस्कृतम्

(नवमवर्षे प्रथमोऽङ्कः)

१५ जनवरी १९८७

सम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम् (९/१)

(R. N. 34554/79)

(जनवरी १९८८ ई०)

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्काः
१. सम्पादकीयम्		१
२. संस्कृतवाणी	कविरत्न ओम्प्रकाश ठाकुरः, दिल्ली	३
३. कोऽहम्	प्रो० सत्यव्रत शास्त्री, दिल्ली	७
४. भारत्यर्चनम्	डा० कैलाशनाथ द्विवेदी, इटावा	९
५. आतङ्कवादः पुनरुग्रवादः	श्री रामेश्वरदत्त शर्मा, भिवानी	१०
६. अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीनाः घटनाः	श्रीमती शशिप्रभा गोयल, दिल्ली	११
७. लक्ष्मीशतके उदाहृतानाम् आख्यानकानां संग्रहः	प्रो० वरदराज कण्णन्, हैदराबादः	१७
८. श्रीगङ्गावन्दनम्	डा० रामकिशोर मिश्रः, खेकड़ा	३३
९. शिमला	आचार्य श्रीनिवास रथः, उज्जयिनी	३७
१०. अहं स्वतन्त्रता भणामि	डा० रमाकान्त शुक्लः दिल्ली	४०
११. मैं स्वतन्त्रता तुम्हें पुकारती	श्री कृष्णमुरारिशर्मा	४१
१२. मा भव	श्री मधुर शास्त्री, दिल्ली	४८
१३. देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	४९
१४. संस्कृत-जगद्वार्ता	श्रीमती रमा शुक्ला	५१-५६

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली

२. प्रकाशनकालावधिः—त्रैमासिकम्

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्लः इति नामाहं उद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

डा० रमाकान्त शुक्लः
प्रकाशकः मुद्रकश्च

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य अस्मिन्नङ्के कवितासप्तकम्, एका सानुवादा कविता, लेखद्वयं, देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च प्रकाश्यन्ते ।

मात्रिकवृत्तविरचितायां 'संस्कृतवाणी'-इत्यस्यां कवितायां कविरत्नश्री-ओम्प्रकाशठाकुरमहाभागेन संस्कृतभाषाया गरिमा समुपस्थापितः । गतिमय्यामस्यां रचनायां कविना संस्कृतभाषाया भाषागतवैशिष्ट्यस्य, समृद्धवाङ्मयस्य, प्राचां ग्रन्थकृतां, समकालीनकवीनां, प्रमुखसंस्कृतपत्रपत्रिकाणां च उल्लेखेन साकं साम्प्रतिके काले तस्या उपेक्षाया अपि सङ्केतो दत्तः । कविः सामर्थ्यशालिनोऽपि जनान् उदासीनान् वीक्ष्य तान् संस्कृतस्य सेवार्थं सोद्यमान् कर्तुमिच्छति । श्रीठाकुरमहाभागस्येयं रचना ऐतिहासिकं महत्त्वमपि बिभर्ति ।

'कोऽहम्' इत्यस्यां कवितायां पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना सम्प्रति च दिल्लीविश्वविद्यालयस्य संस्कृतविभागाचार्येण 'थाईदेशविलास'-'बोधिसत्त्वचरित'-'गुरुगोविन्दसिंहचरित'-'श्रीमतीन्दिरागान्धि-चरित' - प्रभृत्यनेकग्रन्थकर्ता संस्कृतजगते सुपरिचितेन विदुषा कविवरेण डा० सत्यव्रतशास्त्रिमहाभागेन मनोज्ञरीत्या अष्टसु शार्दूलविक्रीडितवृत्तेषु अद्यत्वे शिक्षा- चिकित्सा- राजनीति - सार्वजनिककार्यपद्धत्यादिषु विद्यमानेन कदाचरणेन ग्रस्तस्य दिग्भ्रान्तस्य मनुजस्य दशा वर्णिता । असमस्तपदानां प्रयोगेण कविनास्यां रचनायामाद्यन्तं सरलता-सरसते निर्व्यूढे ।

'भारत्यर्चनम्' - इत्यस्यां रचनायां डा० कैलाशनाथद्विवेदिमहाभागेन भारती स्तूयते । 'आतङ्कवादः पुनरुग्रवादः द्वावेव संसारविनाशकौ तौ' इत्यस्यां रचनायां भिवानी-वासिना श्रीरामेश्वरदत्तशास्त्रिमहाभागेन अद्यत्वे 'पञ्चाम्बु' राज्ये प्रत्यहं ताण्डवं कुर्वतः आतङ्कवादस्य उग्रवादस्य च दुष्परिणामाः प्रदर्शिताः । कविरस्यान्तं कामयते । न ज्ञातुं पार्यते, कदा वै देशस्य कर्णधाराः निरागसां संहारं रोत्स्यन्ति !

'श्री गङ्गावन्दनम्' इत्यस्यां दीर्घरचनायां डा० रामकिशोर मिश्रः कृषिवृद्धिकरीं गङ्गां नौति । आचार्यश्रीनिवासरथप्रणीता 'शिमला'-कविता शिमलानगर्या रामणीयकं व्यनक्ति । प्रसिद्धहिन्दीगीतकारस्य श्रीमधुर शास्त्रिणः 'मा भव' इतीयं रचना कविभारतीमुद्दिश्य रचिता ।

'अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः' इत्यस्मिन् लेखे दिल्लीस्थराज्यशिक्षासंस्थान-सस्कृतप्राध्यापिकया श्रीमत्या शशिप्रभा गोयल-महाभागया विंशशताब्द्यां स्वातन्त्र्यपूर्वं स्वातन्त्र्योत्तरं च रचितेषु

कतिपयेषु संस्कृतकाव्यनाटकादिग्रन्थेषु रचनाकारैः स्वसमकालीनाः घटनाः कथं वर्णिता इति सोदाहरणं प्रतिपादितम् । श्रीमत्या गोयलमहाभागाया इयं सोदाहरणवार्ता आकाशवाण्याः दिल्लीकेन्द्रतः १४-१२-१९८६ तारिकायां 'साहित्यिकी'-कार्यक्रमे प्रसारिता बभूव ।

अस्माभिः अर्वाचीनसंस्कृतस्य विगतेऽङ्के यथा सूचितमासीत् तदनुसारं लक्ष्मीशतककर्त्रा डा० वरदराजकण्णन् - महाभागेन लिखितः 'लक्ष्मीशतके उदाहृतानाम् आख्यानकानां संग्रहः' इत्ययं लेखः प्रकाश्यते । आशासे मूलकाव्ये क्वचित्काठिन्यमनुभवतां पाठकानां कृतेऽयं लेख उपकर्त्ता सेत्स्यति ।

देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तायां च विगतेषु त्रिषु मासेषु परिषदि अन्यत्र च समायोजितानां कार्यकलापानां सूचना दीयते ।

अनेनाङ्केन अर्वाचीनसंस्कृतम् नवमं वर्षं प्रविशति । १९७९ तमेशवीयेऽब्दे अस्य प्रकाशनं प्रारब्धम् । दशवर्षाणि यावदस्य प्रकाशनं प्रथमे चरणे सङ्कल्पितमासीत् । अष्टवर्षेषु महर्घता अभ्रंलिहा संवृत्ता । मुद्रणव्ययश्चतुर्गुणः सञ्जातः । बहवः कृपालवो ग्राहकाः पुनः पुनः प्रार्थ्यमाणा अपि शुल्कं न मुञ्चन्ति । केचन डाकविभागस्य कृपया प्रथमवारे अङ्कमेव न लभन्ते । अतः पुनरपि तेभ्योऽङ्कः प्रेष्यते । सर्वकारेण यत्पुनरनुदानं दीयते तत्तु पत्रस्य 'शाकाय वा लवणाय वा'पि नालं भवति । वेतनेन कर्मकरा नियोक्तुं नैव शक्यन्ते । किं क्रियेत ! तथापि दशवर्षाणि यावत्तु अर्वाचीनसंस्कृतं प्रकाशयिष्यत एव । किन्तु वर्तमानग्राहकशुल्केनातःप्रभृति पाठकेभ्योऽर्वाचीनसंस्कृतं दातुं न शक्यते । अतो वैवश्येन मूल्यवृद्धिः क्रियते । आशासे, जीवनस्य प्रत्येकं क्षेत्रे महर्घतां सहमाना पाठका अर्वाचीनसंस्कृतस्य ग्राहकशुल्केऽपि तां सहिष्यन्त एव ।

२५-१-१९८७ तारिकायां आकाशवाण्याः सर्वभाषाकविसम्मेलने प्रसारिता एतत्पंक्तिलेखकस्य 'अहं स्वतन्त्रता भणामि' इतीयं रचना श्री कृष्णमुरारि शर्मकृतहिन्दीरूपान्तरेण साकं अनेकश्रोतृणामनुरोधादस्मिन्नंके प्रकाश्यते । नववर्षं गणतन्त्रदिवसं चोपलक्ष्य पाठकेभ्यः शुभकामनाः समर्प्यन्ते । अंकस्य प्रकाशने दशदिनानां विलम्बः क्षन्तव्यः सुधीभिः ।

२६-१-१९८७ गणतन्त्र-दिवसः
आर-६, वाणी-विहारः
नयी दिल्ली-११००५९

रमाकान्त शुक्लः

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

संस्कृतवाणी

(कविरत्नम् ओम्प्रकाश ठाकुरः, डी-७५७, सरस्वती-विहारः,
दिल्ली-११००३४)

(१)

सृष्टेररुणोदयवेलायामात्मानमवालोके जातां
शब्दार्थमयं शुचिपरिधानं दधतीं तारुण्यमथ प्राप्तां
परमेशकृपावशतो वर्णः सर्वो मे मन्त्रमयो जातः
आविर्भूतं वेदज्योतिस्तिमिरस्य चयो विलयं यातः
दिवि देवैः प्रतिष्ठापिताऽहो स्वीये हृदये वदनाम्भोजे
मनुजैर्व्यवहारपदे निहिता देशे देशे गेहे गेहे
ऋषिभिर्गीता मुनिभिर्ध्याता परिशुद्धा मन्त्रमयी वाणी
नाम्ना व्याजह्रेऽहं विबुधैः संस्कृतभाषा संस्कृतवाणी।

(२)

वैज्ञानिकता भाषाध्वनिषु लिप्यामपि रचनासुन्दरता
नवपदनिर्माणकरी क्षमता संस्कृतवाण्या मे श्लाघ्यतरा
संस्काराणामाचाराणां व्यवहारविचाराणां वाणी
अक्षर - मात्रागणनाद् यमिता जाता संगीतमयी वाणी
ध्वन्यात्मकवर्णवितानवती नानाच्छन्दोऽलंकृतचरणा
नर्तननिपुणेव नटी रङ्गे नूपुरझंकृतिझंकृतचरणा
साहाय्यमपेक्षन्ते नित्यं नवपदरचने प्रान्तीयगिरः
उपजीव्यतया सौन्दर्यदृशा नवपदजातैः पुष्णामि च ताः।

(३)

विश्वे विभिन्नदिग्भागेषु पश्यामि कदाचिद् विहरन्ती
हिब्रू-जर्मन-लैटिन-रशियन-ग्रीकाद्याः पुत्रीः दौहित्रीः
नानावर्णा नानावेषा धारितभौगोलिकसंस्काराः
निवसन्तीर्जनसमुदायेषु पोषितनिजलघु-गुरुपरिवाराः

भाषाविज्ञानविदोऽस्माकं विस्मृतसम्बन्धं पूर्वतनम्
आभाष्य पुनर्ब्रुवते वाचां तासामेकान्वयतो जननम्
वसुधामखिलां निजपरिवारं संवीक्ष्यानन्दपुलकितायाः
गातुं मे मनस्तदा कुरुते हरिमहिमानं स्फुरदधरायाः ।

(४)

वेदस्तु विभोर्निःश्वसितमयो विज्ञानमयोऽखिलभूतहितः
प्रथमा महती रचना जगतां छन्दोग्रथिता गीर्वाणगिरा
तन्मन्त्रजपे निरताः केचित् केचिद् यागैः प्रीणितदेवाः
तत्तत्त्वविचारार्पितजनुषो मनुतनुजनुषो भुवि महनीयाः
आत्मानमहं धन्यां मन्ये निगमागममयकायो यस्याः
सद्ग्रन्थविरचने संसक्ता ऋषयो मुनयोऽखिलविश्वहिताः
तेषां महनीयचरित्राणां तपसा संधारितभूरिबला
पठिता रटिता मननं नीता गीता ज्ञाताऽहं कामदुघा ।

(५)

श्रीवृद्ध्यै मम कवयोऽसंख्या कृतबहुयत्नास्तत्परमनसा
सत्काव्य-गद्य-चम्पू-रूपकरचना महतीर्व्यदधुश्च पुरा
व्यासो वाल्मीकिरथो भासः कविताकामिन्या मृदुहासः
बाणो जयदेवो भवभूतिः काव्योद्याने किल मधुमासः
भारतसंस्कृतेरमरगायककविकालिदासतुल्याः केऽन्ये ?
सर्वेऽप्यानतशिरसस्तस्मै यद्दत्तं तेन सकलजगते
आयुर्वेदे ज्योतिःशास्त्रे व्याकरणे धर्मे नयशास्त्रे
अध्यात्मे नाट्य-कथाशिल्पे के समाः कथय सकले विश्वे ।

(६)

बह्व्यः संस्था यद्यपि देशे विदुषामपि भूयिष्ठा संख्या
अर्वाचीना प्राचीना वा दिङ्मात्रमुदाह्रियतेऽत्र मया
भात्यखिलभारतीया संस्था संस्कृतसम्मेलननामयुता
परिषत् संस्कृतसेवानिरता नाम्ना प्रथितेन्द्रप्रस्थीया
एषा च देववाणी-परिषद् विविधं सुरगिरं समर्चयते
संस्कृतसेवासंस्थानं च विमलां कीर्तिं संधारयते

कर्ता श्रीराधासुधानिधेरभिनन्द्यः श्रीहितहरिवंशः
श्रीरूप-जीव-गोस्वामिद्वयकीर्त्या राजन्ते सर्वदिशः ।

(७)

श्रीजगन्नाथपण्डितराजो रससिद्धकवीनां ख्याततमः
वेदान्तदेशिकः काव्यपटुः क्षेमेन्द्रो मुनिविद्यारण्यः
बुधवरमधुसूदनसरस्वती व्यासः शिवराजविजयकारः
गिरिधरशर्मा दाधीचो वा संस्कृतवाण्याः सदलङ्कारा:
वैयाकरणानां मूर्धन्यः श्रीचारुदेवपण्डितवर्यः
भट्टः श्रीमान् मथुरानाथो हृदयावर्जकवाङ्माधुर्यः
यः शास्त्रविदां धुर्यः कविराट् सद्ग्रन्थविनिर्मितिलब्धयशाः
श्रीमानमीरचन्द्रः शास्त्री शशिधरशर्मा विद्वद्वर्यः ।

(८)

एवं शास्त्राणां मर्मविदो नानाविद्यानां वक्तारः
साहित्यविधानां विविधानां स्रष्टारो ह्याविष्कर्तारः
सत्यपि संघर्षमये समये प्रबलोत्साहैर्द्रावितबाधाः
लोकानामालोकस्तम्भाः केषामिह लोके नाराध्याः
या क्षमा विचाराविष्करणे योग्या याचां चालङ्करणे
यस्या भात्यद्भुतपदकोषः यस्यां सर्वाः साहित्यविधाः
यत्काव्यसुधां पायं पायं निर्वृतिमतुलां लभते प्राणी
मधुरा सरसा संगीतमयी विख्याताऽहं संस्कृतवाणी ।

(९)

गम्भीरघोषकवितापाठी श्री श्रीनिवास आचार्यवरः
भास्कराचार्य आलंकारिकनवलोकगीतरचनाचतुरः
कोकिलकण्ठो नवगीतकरो राजेन्द्रमिश्र-कविताकान्तः
गायन् मधुरं 'भाति मे भारतं' कविशार्दूल-रमाकान्तः
सत्यव्रत - शुक्लरमेशचन्द्र - वर्णेकर - वेलणकरादयः
कविरत्नं ठाकुर ओम्प्रकाश इत्येवं समकालिककवयः
नलिनी - लीना - पुष्पाः सर्वाः कवयित्रीणां परमप्रथिताः
गीतैर्ललिताभी रचनाभिः सततं मदर्चनायां निरताः ।

(१०)

गाण्डीव-सुधर्मा - गुञ्जारव - ऋत - ऋतम्भरा -गीर्वाणसुधाः
दूर्वा संस्कृतचन्दामामा शोधप्रभाऽथ परमार्थसुधा
संस्कृतप्रतिभाऽर्वाचीनसंस्कृतं विश्वसंस्कृतं व्रजगन्धा
लोकसंस्कृतं संस्कृतामृतं संगमनी तथा सर्वगन्धा
संवित् - संस्कृतभवितव्य - विश्वभाषा-सूक्तिसुधा - सागरिकाः
गैर्वाणी स्वरमङ्गला पारिजातं मनोरमा मालविका
भारती कामधेनुर्मेधा प्रतिभा शारदा देववाणी
एतैरन्यैः पत्रैश्च नवैः सप्राणाहं संस्कृतवाणी ।

(११)

एषा न केवलं भाषाहं नो वाग्व्यवहाराणां वाणी
सन्देशममरताया लभते मत्तो नैराश्यगतः प्राणी
अस्यामाशाया दीप्तविभा विश्वासस्योज्ज्वल आलोकः
जीवेम शतं वर्षाणीति जीवितुमिच्छा मनसि प्रबला
आस्तां मनसो दैन्यं दूरे केयं हीना नैराश्यकथा
अपयातु पराश्रितता चित्ताद् देहादपयातु च निर्बलता
एवंविधसूक्तिसुधाधारा सत्साहित्योदधिसम्भूता
अपवाह्य समस्तं नैराश्यं प्रददाति पराश्चित्ते प्रमुदः ।

(१२)

विपिने मुनिपर्णोटजमध्ये सुरमन्दिरस्थविद्याकेन्द्रे
आचार्यकुले च गृहस्थानां धनिनामावासे वा हर्म्ये
तीर्थे पुण्ये चैत्ये च मठे प्रीत्या शालासु विहरमाणा
राजाश्रयमनपेक्ष्यापि विभोः कृपया सर्वत्राऽऽद्रियमाणा
सम्प्रत्युपेक्ष्यमाणा लोकैः भौतिकताया दीप्त्या मुग्धैः
अपचीयमानसर्वावयवा जीवामि हन्त किं नात्मबलैः
बहवः किलः सन्ति मठाधीशाः जीवन्तो नाम जपन्तो मे
उद्यमरहिताः सति सामर्थ्ये, कुर्वे किमदृष्टे विपरीते !

●

कोऽहम् ?

(डा० सत्यव्रतशास्त्री, ३/५४ रूपनगरम्, दिल्ली-११०००७)

(१)

प्रश्नोऽयं समुदेति मे मनसि भोः कोऽहं कुतस्त्यस्तथा
किं वा नाम करोम्यहं जगति किं कुत्रास्म्यहं संस्थितः ।
किं लक्ष्यं किम् वा महत्त्वमथवा किं वा ममाऽऽस्ते पदं
आत्मा मे सुतरामसंस्तुत इति प्राप्तोऽस्मि चित्रां दशाम् ।।

(२)

यद्यच्चिन्तनमस्ति मे मनसि किं वाचा भवेत् तत् स्फुटं
किं वा कर्मणि तद्भवेत्परिणतं किं वा परेभ्यो भवेत् ।
तत्सम्यक् प्रतिपादितं किमथवा ज्ञातं मया स्यान्नवे-
त्येवं विप्रतिपन्नमानसतया नो शान्तिमाप्नोम्यहम् ।।

(३)

किं मे धावनमस्तु वा सुविरतिः कार्यान्तरेभ्यो भवेत्
किं वा तेष्वभिरक्तिरस्तु किमु वा तेभ्यो विरक्तिर्भवेत् ।
चिन्ताचान्तमना इति प्रविततं सर्वं चरं चाचरं
पश्यन् व्याप्तमिदं जगत् किमपि किं नैवाहमालोकये ।।

(४)

ज्ञानं मे प्रथितं मया च पठिता ग्रन्था अनेके भुवि
तत्किं मे परवञ्चनादिकृतिषु स्वीया प्रवृत्तिः सदा ।
दीनां दुर्विधतां गतां च जनतां नो वीक्ष्य चित्तद्रुति-
र्मेऽन्धो वा बधिरोऽथ वाहमिति मे नैवास्त्यहो निर्णयः ।।

(५)

दिव्योऽहं सुविभूषितो गुणगणैर्लोकस्य पूज्यस्तथा
कुर्वन् वैभवशालिभव्यभवने वासं सदर्पं सदा।
ध्यायन् द्रव्यमुपार्जितं कुसृतिभिर्नैकैस्तथा गर्हितैः
कृत्यैश्छद्मपरैर्नृशंसपरमैः शान्तिं परां नाप्नुवे॥

(६)

आढ्यानामकृतात्मनां बत! कृते श्राम्यामि रात्रिन्दिवं
नैवाहं च लभे कथञ्चिदपि हा स्वीयामभीष्टां भृतिम्।
हर्म्याणां रचनाविधावनुदिनं श्रान्तस्य मे हन्त भो!
वासः पर्णकुटी विशीर्णमलिनं वासो ममाच्छादनम्॥

(७)

आचार्योऽप्यनुशास्मि नैव सततं राज्ञां नयेऽवस्थितो
वैद्योऽहं परमातुरादिविषया चिन्ता न मां बाधते।
कार्याणां लय इत्यनेन विधिना कार्यालये कार्यकृद्
उत्कोचादिपरः परार्थघटकः सौख्यं परं व्यश्नुवे॥

(८)

कः पन्थाः किमु मे स्वरूपमथवा कस्यास्म्यहं भूतले
किं वा कर्म करोमि कस्य च कृते श्राम्याम्यहं सन्ततम्।
किं वा वच्मि शृणोमि किं किमथवा ध्यायामि यामि क्व च
कोऽहं वेति न वेद्मि हन्त! किमिति भ्राम्यामि दिग्भ्रान्तवत्॥

(इयं कविता कतिपयवर्षाणि पूर्वम् आकाशवाणी-समायोजिते सर्वभाषा-कविसम्मेलने प्रसारिता बभूव। सम्पादकः)

भारत्यर्चनम्

(डॉ० कैलाशनाथ द्विवेदी, डी०लिट्०, इटावा)

गायन्ति वेदाः वरदानदात्रीं, पश्यन्ति प्राज्ञाः परमात्मरूपाम् ।
शृण्वन्ति सर्वे शुभलोकलीलां, लीलामयीं लोकनुतां नमामः ॥१॥

या कीर्तिता भारतभाग्यलक्ष्मीः,
या पूज्यते प्राणिषु मातृशक्तिः ।
या धार्यते धीर्धृतियुज्जनेषु,
तां ज्ञानदेवीं सततं नमामः ॥२॥

आसिन्धुशैलेन्द्रसुशोभिते हे,
भागीरथीनीरतरंगिते हे ।
काशीपुरीभिः परमां सुरम्यां,
त्वां भारतीं भक्तिप्रदे भजामः ॥३॥

देशे दशा दैन्यकरी दरिद्रा,
स्वाधीनतायां गतराष्ट्रभक्तिः ।
विभिन्नभाषामतजातिधर्माः,
सर्वे सहायाः जनतैक्यनाशे ॥४॥

स्वार्थान्धकूपे कतिचिद्विमग्नाः
केचित्तु नग्नाः पशुताबलेन ।
हा हन्यते मानवता वराकी,
रक्षस्व हे भारतभाग्यदेवि ॥५॥

हिंसाप्रचण्डा जनप्राणहन्त्री,
संगीतशून्या त्रुटतारतंत्री ।
गंत्री गता गर्त्तमये कुमार्गे,
संचालयेमां गतिनाशु देवि ॥६॥

आतंकवादं जननाशकं त्वं,
धर्मान्धतातीव्रविषञ्च रुन्धि ।
हिंसानलं नाशयितुं तुदेवि,
तेजोमयी तत्परता तवैव ॥७॥

रक्षा भवेत् राष्ट्रभुवो भविष्ये, भवेत् समृद्धिः सततं च शान्तिः ।
भूयात् सुकीर्तिः भरतावनेर्हि, देशेषु देदीप्यतु देश एषः ॥८॥

आतङ्कवादः पुनरुग्रवादः ।
द्वावेव संसारविनाशकौ तौ ।।

(श्रीरामेश्वरदत्तशर्मा, ३ विकासनगरम्, भिवानी)

अयि भारतवर्षवासिनः ! यवना हिन्दु-सिखाखिला जनाः ।
क्रियते निजबन्धुहिंसनम्, कथमद्यास्तमिता विवेकिता ।।१।।
परतन्त्रतया श्ववृत्तयो गतगर्वाः परसंस्कृतौ ताः ।
निजबन्धुविशेषदूषकाः शतशो वर्षमिता वयं यतः ।।२।।
सुचिरात् समयात् पृथक्चरा, रिपुछद्मेन विभिन्नतां गताः ।
अरिणा त्वरया विमर्दिताः, न वयं जागृमहेऽधुनाप्यहो ।।३।।
अलभन्त यदा स्वतन्त्रताम्, सहभागान्वित नायकोत्तमाः ।
प्रकृतिस्थित-भेदभावतो वयमालेभिमहे द्विराष्ट्रकम् ।।४।।
स्मरत प्रथमं दशाननम्, अनुजेनैव स घातितः पुरा ।
बलबुद्धिकलाविशारदो बहुसेनापरिवारसंयुतः ।।५।।
कुरुपाण्डववीरसैनिकाः, गृहयुद्धेन मिथः क्षयं गताः ।
न तदा बलिनो मृताः पुनः, सकलं वैभवमस्ततां गतम् ।।६।।
बहु धान्यधनादिकेन ये, परिपूर्णा अभवन् बलादिभिः ।।७।।
यदवो बहुसंख्यकास्तु ते, गृहयुद्धेन विनाशमाप्नुवन् ।
जयचन्दनृपो व्यघातयत्, निजकं बन्धुमतीर्ष्यया यदा ।
शतशो हि समा वयं गता, यवनानां परतन्त्रतां तदा ।।८।।
पुनरद्य त एव शत्रवो भवतां राष्ट्र-विखण्डनं पुनः ।
जनताविकृतिं विकुर्वते निजषड्यन्त्रबलैः सुयोजितैः ।।९।।
अबला विधवा निराश्रिताः पितृहीनाः शिशवो रुदन्ति ये ।
करुणं रुदनं विलोक्य हा ! शतधा किन्नु हृदा न भिद्यते ।।१०।।
महती कटुता विवर्धिता, ग्रसते सौहृदयं परस्परम् ।
गमनागमने विशङ्किते, भवतान्निसरणं सुदुष्करम् ।।११।।
बलवानबलं सुरक्षति, विपरीतं बहु चात्र वर्तते ।
असुरस्य वधे हि शूरता, जनसामान्यवधे क्व वीरता ।।१२।।
न कदापि जनो धरातले सफलोऽभूत् प्रतिहिंसया सखे ।
समतासहभागितादयाक्षमताशान्तिसुखैः सुजीवनम् ।।१३।।
जगतीजनजीवनं वरम्, सकला एकपथेन यान्ति ते ।
इह भेदविखण्डनैकता विविधा भिन्नपथा हि देहिनः ।।१४।।
ननु जाग्रत देशवासिनः, उत नो चेत् परतन्त्रता पुनः ।
पशुवद् भविता हि जीवनम्, न तदा हिन्दुसिखौ न मुस्लिमः ।।१५।।

अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः

(श्रीमती शशिप्रभा गोयल, राज्यशिक्षासंस्थानम् दिल्ली)

संस्कृतभाषा भारतीयानामाचारविचाराणां भाषा अस्ति। तत्र भारतस्य पुरातनः इतिहासः, शास्त्राणि, दर्शनं, विज्ञानं, संगीतं, चित्रकलादिकाश्चतुष्षष्टिः कलाः, शिल्पम्, मनोरञ्जनानि, कथोपन्यासादिपरकं साहित्यं, काव्यानि च उत्तमोत्तमानि शोभन्ते। जगति सर्वत्र तद् वाङ्मयं विकीर्णं भवद् विभाति। साम्प्रतमपि प्रत्यहं नवीनं साहित्यमवतीर्णं दृग्गोचरतां याति। इदं हि अनुदिनम् उत्पद्यमानं तदीयं नूतनं साहित्यं तस्याः संस्कृतभाषायाः जीवितत्वमुपपादयितुम् अलम्।

साहित्यं तु समाजस्य प्रतिबिम्बमात्रम् एव इति स्वीक्रियते मनीषिभिः। प्रतिदिनं संघटितानाम् समाकलनं तु नूनमेव प्राप्स्यति स्थानम् साहित्ये। स्वाधीनतासंग्रामः, देशभक्तानाम् प्राणोत्सर्गः कथं न प्रेरणाप्रदः स्यात् कविभ्यः। एकैको भारतीयो भवेत् स्वराज्ये अनुरागवान्, स्वराष्ट्रे भक्तिमान्, स्वधर्मे संस्कृत्यां सभ्यतायाञ्च दृढस्नेहः अयमेव स्वरः सम्यक् उद्घोषितः अनुगुञ्जितश्च विंशशताब्द्याम् रचिते संस्कृतसाहित्ये।

केचन कवयः महर्षिदयानन्दस्य स्वामिनः पूजनीयं चरित्रं, स्वकाव्यस्य वर्णनीयविषयत्वेनावरिषत। महर्षिदयानन्दसरस्वती वस्तुतः स महापुरुषो बभूव, यो यदा सितांगाः भारते समाविशन्, स्वतन्त्रतार्थम् स्वराज्याधिगमनार्थं च शंखमधमत्। पण्डितप्रवराखिलानन्दविरचितदयानन्ददिग्विजयनाममहाकाव्ये, आचार्यमेधाव्रतस्य अपि दयानन्ददिग्विजये, शास्त्रिविद्याधरप्रणीतदयानन्दर्षिचरिते, आचार्यरमाकान्तोपाध्यायकृतदयानन्दचरिते च सम्यक् तत्कालीनसामाजिकावस्थायाः चित्रणम् दृश्यते।

स्वामी दयानन्दः देशे प्रसृताः कुरीतीः, मुखं व्यादाय विचरताम् दम्भाडम्बरच्छलकपटपरिपूर्णमतमतान्तराणां निबिडां विशालां ततिं च समूलमक्षिणोत्, देशस्य सांस्कृतिकराष्ट्रियतादिकान् भावान् भारतीयानाम् स्वान्तेषु सञ्चारितवान् यथा स आदिष्टः आसीत् गुरुविरजानन्दमहाभागैः। महर्षिः न्यवेदयत्—

अकिञ्चनोऽहं गुरुदक्षिणाक्षमः,
समर्पये नाथ लवङ्गदक्षिणाम्।
कृतोपकारस्य गुरोर्भवदृणात्
कदापि मुक्तो भवितुं क्षमोऽस्म्यहम्॥

राष्ट्रप्रेमसिक्तः गुरुः तदा उपदिशति—

'विनाशय त्वं प्रसृतं स्वभारते,
कुरीतिवृन्दं छलदम्भभीषणम्।
अवैदिकं सर्वमितः मलीमसम्,
इयं मता स्यात् तव दक्षिणाधुना॥

एवम् प्रतिबिम्बितं वर्तते अस्मिन् विंशतिसर्गात्मके दयानन्दचरितमहाकाव्ये आचार्यरमाकान्तकवेः हृदयस्य स्वदेशोद्धारभावना देशप्रेम च।

राष्ट्रीयतां, भारतीयां संस्कृतिं, भारतीयानां आचारविचारान् धर्मञ्च भारतीयानां सचेतसां पुरतः प्रस्तवीतुं यानि महाकाव्यानि अस्मिन् वर्तमानशतके प्रणीतानि तेषु कानिचत् स्वामिविवेकानन्दस्य, लोकमान्यबालगंगाधरतिलकस्य महनीयं चरित्रं महात्मनः गान्धिनो वन्दनीयं चरित्रं, पण्डितजवाहरलालनेहरूमहापुरुषस्य पावनं जीवनचरित्रं गायन्ति कीर्तयन्ति च।

तत्तन्ममहापुरुषजीवनचरित्रवर्णनद्वारेण ते ते महाकवयः स्वातन्त्र्यसंग्रामस्येहितासमपि अवर्णयन्।

श्रीअमीरचन्द्रशास्त्रिविरचितनेहरुचरितात् उद्ध्रियन्ते काश्चन पंक्तयः—

'कारागृहे निगडितस्तिलकोऽत्र हेतुः'

अपि च—

यूरोपीये महति समरे दान्त उत्साहलेशो
देशे व्याप्तः प्रतिपदमहो यन्त्रशालाः प्रवृत्ताः॥

अन्यदपि दृश्यताम्—

चौरीचौराकाण्डतोऽन्तरं नोऽमन्दावेगान्दोलनं रुद्धमासीत् ।
मन्ये कांग्रेसस्य नेतृष्वमर्षो भूयान् व्याप्तो गान्धिमेकं विहाय ॥

यरवदाकारागृहतः लिखितम् सन्धिपत्रम् अधिकृत्य लिख्यते—

यरवदाकेन्द्रीयकारागारतः पूनास्थितैः,
लिखितमेतत्सन्धिपत्रं पण्यबन्धनमास्थितैः ।
व्रतपरैः कांग्रेसनेतृभिरत्र सप्रजयकरौ,
प्रति तु नेहरुगान्धिनायडुभिः पटेलसमन्वितैः ॥

श्रीनेहरूमहाभागेनः कृतां स्वाधीनताविषयकप्रतिज्ञामधिकृत्य लिख्यते तत्र—

षड्विंशं जनवर्यहोऽथ सकलस्वाधीनतावासरः
स्यादस्माकमिति प्रतिज्ञपयता श्रीनेहरूब्रह्मणा ।
देशस्यास्य विशालभालपटले स्वातन्त्र्यमालेखितम्
वर्षे व्योमगुणग्रहेन्दुगणिते शालातुरे संसदि ॥

श्रीविश्वनाथकेशवच्छत्रेप्रणीतमहाकाव्ये श्रीसुभाषचरिते तु आजादहिन्दसेनेतिहासः त्यागः शौर्य्यम् च मर्मस्पर्शिण्या वाण्या प्रतिपादितम् । आह्वयति सुभाषः स्वदेशवासिनः

भाव्यं शार्मण्यराष्ट्रस्य युष्माभिर्युद्धवन्दिभिः,
स्वतन्त्रहिन्दसेनां तद्द्वारा युङ्क्तातिसत्वरम् ।
विलम्बोऽल्पोपिः युष्माभिः कार्यनाशाय सम्भवेत् ।
त्वर्यतां त्वर्यतां तस्माद् भ्रातरो 'जयहिन्द' वः ।

तत् क्रान्तियुद्धम् भारतीयस्वातन्त्र्यसमरकथां च सम्यक् वर्णयन्ति महारानीझांसीलक्ष्मीबाईचरितम्, द्वाविंशतिसर्गात्मकम् महाकाव्यम् झांसीश्वरीचरितम् च इत्यादयः काव्यग्रन्थाः ।

अणुविस्फोटध्वस्तजापानदेशस्यापि मार्मिकं चित्रणं दृश्यते नेहरूयशःसौरभमहाकाव्ये—

ध्वस्तोऽणुविस्फोटवशाद् विपन्नो,
जापानदेशः सहसा पपात ।
व्यादाय कालो मुखमट्टहासैः
यत्र स्थितां मानवतामलीढ ॥

अस्मिन्नेव ग्रन्थे भारतस्य राष्ट्रसंघसदस्यता अपि वर्णिता । अपि च ताशकन्दसन्धिः, पाकिस्तानबंगदेशयोर्गृहयुद्धं, पाकिस्तानस्य भारतस्योपरि आक्रमणम्, भारस्य विजयः बंगदेशस्योदयः इत्यादि-घटना अपि नोपेक्षिताः ।

स्वतन्त्रताप्राप्तेरनन्तरम् भारतस्य विभिन्नप्रदेशानाम् विलयस्य यः प्रयत्नः कृतः तस्यापि वर्णनम् समुपलभ्यते नीरपाजेभीमभट्टरचिते काश्मीरसन्धानसमुद्यमम् हैदराबादविजयम् इति नाटकद्वये । श्रीरामकृष्णशर्मविरचिते बंगलादेशोदये नाटके बंगलादेशनामकस्य नवोदितराष्ट्रस्य जन्मकथा अतीव मर्मस्पर्शिण्यां शैल्याम् प्रस्तुता ।

इन्दिरागांधीमहाभागा यदा प्रधानमन्त्रिपदमासीना तदपि वर्ण्यते नेहरूःशयसौरभे महाकाव्ये—

राष्ट्रं विलोक्य परितः सहसाऽसहायं
तामिन्दिरां सपदि लोकसभासदस्याः ।
चक्रुश्चरित्रगुणभूषणभूषितांगीं,
मन्त्रिप्रधानपदवीपरिमण्डितां ते ॥

अर्वाचीनसाहित्ये न केवलं राजनैतिकघटनानामेव वर्णनम् प्राप्यते अपि तु वैज्ञानिकी प्रगतिः, देशस्य चतुर्मुखविकासश्चापि नोपेक्ष्यते साहित्यकारैः । डा० रमाकान्तशुक्लमहाभागैः 'भाति मे भारतम्' इति स्वरचनायाम् भारतस्य वैज्ञानिकी प्रगतिः अपि सम्यक् वर्णिता—

भाखडाबन्धदामोदरीयोजनां,
बाणगंगाफरक्कादिभिः संचितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं,
भूतले भाति मेऽनारतं भारतम् ॥

विद्युदुत्पादने तैलसंशोधने,
इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये च पूर्णक्षमम्.
भूतले भाति मेऽनारतं भारतम् ॥

आर्यभट्टम् वियन्मण्डले स्थापयद्,
पोखरण्भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं,
भूतले भाति मेऽनारतं भारतम् ।
रोहिणीं प्रक्षिपद् भास्करं साधयद्

आत्मनीनैरमोघैर्मितैः साधनैः ।
युद्धपोतांश्च सिन्धूरसि स्थापयद्,
भूतले भाति मेऽनारतं भारतम्॥

बरौनी-भिलाईबोकारोयन्त्रशालानाम् संयन्त्रणाम् ध्वनिघोषेण उपमीयते भारतस्य उन्नतिस्यन्दनस्य स्वरः ।

यद् बरौनीभिलाईबुकारोस्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा,
भूतले भाति तन्मामकं भारतम् ॥

पाश्चात्यसभ्यतागतभौतिकविलासैः प्रभावितो अद्य भारतः शोचनीयामवस्थाम् गतः । गोदावर्म्मयुवराजेन प्रणीते भाणे अद्यतन-चित्रपटसभ्यतावशीभूताः आधुनिकाः युवकाः युवतयश्च कथम् देवानन्दाशोककुमारसाधनावैजयन्तीमालादितारकगणैः प्रभाविताः वस्त्रधारणम् कुर्वन्ति इत्यस्यापि वर्णनम् संलक्ष्यते । भ्रान्तभारते नाम नाटके नारदः आधुनिकताप्रवणं भारतमनुशोचति । कथ्यते च तत्र संस्कृतेः सुरक्षा वैदेशिक-शिक्षाबलेन न विधातुम् शक्यते । मूलमुच्छिद्य चेच्छेत् को विद्वान् वृक्षस्य रक्षणम् । अस्मिन्नेव ग्रन्थे ततो विवाहायु-रधिकृत्य तर्कवितर्का जायन्ते । डा० रमाकान्तशुक्लमहाभागैरपि भारतस्य दुर्दशाम् वीक्ष्य कथ्यते—

दुःखदावानलैर्दग्धदेहान्नरान्,
क्षुत्पिपासाकुलान् वृत्तिकष्टार्दितान् ।
वीक्ष्य कारुण्यपूर्णा नरा यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥

यद्यपि भारतेऽनेके दोषाः सन्तु परन्तु कविस्तत्र उदारमनाः राष्ट्रभक्तिभावनया ओतप्रोतहृदयः संस्तौति—

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः,
किन्तु नाहं प्रपश्यामि तान्मन्दधीः ।
वन्दनीयं मया, कीर्तनीयं मया,
मोदताम् वर्धताम् राजताम् भारतम् ॥

एवं मे भारतम्, संस्कृतभाषा, संस्कृतसाहित्यम् च नित्यं विलसन्तु नूतनैः विचारैश्च मानवान् देशरक्षायै सततम् प्रेरयन्तु ।

उपभोक्ताओं की सेवा में
चलता-फिरता बाजार

"चलते-फिरते-बाजार" की 35 चलती-फिरती दुकानों ने दिसम्बर, 1986 तक 6 करोड़ 60 लाख रुपये मूल्य की प्रतिदिन काम में आने वाली वस्तुओं की बिक्री की है। इस बाजार की स्थापना अक्तूबर, 1983 में की गई थी।

पिछले तीन वर्षों में इस बाजार को बहुत लोकप्रियता मिली है और उपभोक्ताओं में एक नई चेतना जागृत हुई हैं। इस बाजार से दूर-दराज की कालोनियों के, विशेषकर जहाँ कमजोर वर्गों के लोग रहते हैं, 25 लाख 25 हजार से अधिक परिवारा को लाभ पहुंचा है।

ये चलती-फिरती गाड़ियां प्रतिदिन 100 से अधिक स्थानों से रोजमर्रा के काम में आने वाली वस्तुएं उचित मूल्य पर लोगों को उनके घर के पास उपलब्ध कराती हैं।

प्रशासन इस बाजार के लिये गाड़ियों की संख्या में तथा प्रतिदिन काम में आने वाली वस्तुओं की संख्या में वृद्धि करके इसे और मजबूत बनाने का प्रयास कर रहा है। प्रशासन का लक्ष्य है कि यह व्यवस्था दिल्ली के सभी क्षेत्रों के लिये उपलब्ध हो।

दिल्ली प्रशासन ने उपभोक्ता-मामलों के निदेशालय की भी स्थापना की है जो सरकारी तथा स्वैच्छिक संगठनों के प्रयासों में तालमेल रखकर उपभोक्ताओं के हित के लिए सार्वजनिक वितरण प्रणाली को मजबूत बनाने का कार्य कर रहा है।

उपभोक्ता-आन्दोलन को मजबूत करने के लिये यदि आपके पास कोई सुझाव है तो कृपया लिखें :—

जग प्रवेश चन्द्र
मुख्य कार्यकारी पार्षद,
पुराना सचिवालय दिल्ली-110054

सूचना एवं प्रचार निदेशालय, दिल्ली प्रशासन, दिल्ली द्वारा प्रचारित

लक्ष्मीशतके उदाहृतानां आख्यानकानां संग्रहः

(डा० वरदराज कण्णन्, हैदराबादः)

१. अमृतमथनकथा

पुरा देवा असुराश्च क्षीरसागरं ममन्थुः। भगवान् नारायणः कूर्मरूपी गिरिं धृत्वा मथनाय साहाय्यमकरोत्।

भगवान् शम्भुः तत्रोत्थितं हालाहलविषं स्वयं भुक्त्वा लोकोपकारी वभूव।

ततः परं क्षीरसमुद्रात् कामधेनुः, उच्चैःश्रवाः, ऐरावतः, कौस्तुभं, पारिजातः अप्सरसश्च क्रमेण समुत्पन्नाः। तदनन्तरं महालक्ष्म्या अवतारः

"ततश्चाविरभूत् साक्षात् श्रीरमा भगवत्परा।
रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामनी यथा॥"

महर्षयः यथाविधि तस्या अभिषेकमकल्पयन्। अनेके तस्यै उपहारान् समार्पयन्।

सा तत्र समन्तात् विलोकयन्ती आत्मनः उचितं पदं व्यचिनोत्। अवद्यरहितं सद्गुणपूर्णं वरं कामयमाना मुकुन्दमेव वव्रे। पश्यत्सु सर्वेषु विष्णोः वक्षस्स्थलं झटित्यारुरोह।

२. इन्द्रस्य राज्यावाप्तिः

कदाचित् देवेन्द्रः ऐरावतारूढः सञ्चरन् आसीत्। तदा महर्षिदुर्वासाः तस्मै दिव्यमालामेकां ददौ। तां स्वीकृत्य सः गजस्य मस्तकोपरि न्यस्यत्। स च गजः तां मालां भूमौ आक्षिपत्। एतेन महर्षिः क्रुद्धो बभूव। लक्ष्मीवासस्थानभूतां मालां अवज्ञया इन्द्रः एवमकरोत्

---

१. अस्मिन् लक्ष्मीशतके १०, ४६, १०३ श्लोकेषु अन्यत्र च बहुत्र इयं कथा परिगृह्यते।

२. अस्मिन् लक्ष्मीशतके १७, १०२-तमयोः श्लोकयोः अयं कथाभागः निर्दिश्यते।

इति स दुर्वासाः देवेन्द्रं शशाप । ततः देवेन्द्रः नष्टैश्वर्यः विगलित-लक्ष्मीकटाक्षोऽभवत् । लोकाश्च क्षीणसमृद्धयः अभूवन् ।

शापाक्रान्त इन्द्रस्सावरोधः क्षीरसागरसमुत्पन्नां लक्ष्मीं शरणमगमत् । तां बहुधा अस्तौत् । पुरन्दरकृतमिदं लक्ष्मीस्तोत्रं विष्णुपुराणान्तर्गतं प्रसिद्धम् । अनेकैराचार्यैरनुसन्धीयमानं च ।

तेन प्रीता महालक्ष्मीः इन्द्रमनुजग्राह । ततः परं इन्द्रः त्रिलोकीसाम्राज्यं सर्वसमृद्धिसहितमवाप्य संपदं निरविशत् ।

३. लक्ष्म्या अवतारस्थलानि

पृथिव्यप्तेजोवाय्वाकाशाः पञ्चभूतानि । तत्र प्रथमायां पृथिव्यामवतारः सीतायाः ।

"क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ।
भूतलादुत्थिता सा तु व्यवर्धत" इति ह्युच्यते ।

अथ द्वितीयभूतात् पयसः लक्ष्म्या अवतारः अमृतमथनकाले । अथ तृतीयभूतान् अग्नेरपि कदाचित् अवतारस्तस्याः । तद्यथा । भृगुरिति प्रसिद्धो महर्षिः यज्ञमेकमकरोत् । तस्मिन् यागाग्नौ लक्ष्मीराविर्बभूव । भृगुना सा पोषिता संवर्धिता च । परस्तात् विष्णुमेव सा पर्यणयत् । अत एवोक्तम्—

"आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः"

इत्याचार्यवरेण ।

अथ शिष्टौ वाय्वाकाशौ ।
तयोरपि कथं लक्ष्म्यवतारः ?

"ऋचो यजूंषि सामानि सा हि श्रीरमृता सताम्" इति प्रमाणेन "स्वाधीनपतिकां श्रुतिम्" इत्याचार्योक्तया च लक्ष्मीरेव श्रुतिरूपेणावततार इति निश्चिते सति ईश्वरनिश्वासरूपवायोः शब्दगुणकादाकाशाच्च तदुत्पत्तिस्सुवचा भवति । एवं च पञ्चापि भूतानि कालविशेषेषु लक्ष्म्या अवतारस्थलानि ।

४. सीतासमक्षं न वधः

सीता करुणामयी ।

---

३. अयमर्थः अस्मिन् लक्ष्मीशतके ८१-तमे श्लोके उपवर्णितः ।

४. अयमर्थः अस्मिन् लक्ष्मीशतके ५५-तमे श्लोके टंकितः ।

यद्यपि रामः वहूनां राक्षसानां वधमकरोत् तत्र कश्चन सूक्ष्मार्थः सावधानमवलाकनीयः ।

काकासुरः सीतायामार्द्रापराधी । अतितीव्रदण्डार्हः । निस्संशयं वध्य एव । तथाऽपि स रामात् लघुदण्डमेव प्राप्नोति । कुतः ? सीतासान्निध्यात् ।

मारीचः मायामृगरूपं धृत्वा विचरति । सीता तं मृगं ग्राहयितुमभिलषति । चोदयति च दयितम् । राघव तेन मृगेन अतिदूरं नीतः । अन्ते मृत्युमाप्नोति मारीचः । तत्र सीतासान्निध्याभावात् दण्डो न लघूकृतः ।

एवमेव विराधोऽपि रामलक्ष्मणावाहृत्य सीतां परित्यज्य किंचिद्दूरं गच्छति । तौ विमुच्य मामाहर इति क्रोशति सीता । तदविगणय्य सः तावेवाहृत्य गच्छति । रामश्च लक्ष्मणं प्रति "अनेनैव पथा गन्तव्यमस्माकम् । अतः सः गच्छतु" इत्येव वदति । दूरगमनानन्तरमेव विराधवधः ।

एवमेव श्रीमद्रामायणे सर्वत्रेति द्रष्टव्यम् ।

५. सुग्रीवस्य कथं राज्यम् ?

वाली वलीयान् । वयसा च ज्यायान् । सुग्रीवः तस्य अनुजः । वालिना रामे न किञ्चिदपराद्धम् । वालिसख्यात् रावणजयोऽपि सुलभतरः स्यात् । एवं सति किमर्थं रामसुग्रीवसख्यं समपद्यत ? किमर्थं च वाली हतः ? किमर्थं सुग्रीवस्य राज्यलाभः ?

अत्रेदमुच्यते । रावणः सीतामादाय नभोमार्गेण गच्छति । राम रामेति क्रोशन्ती सीता रक्षकं कमपि न पश्यति । स्वकीयान्याभरणानि वस्त्रे निक्षिप्य आकाशतः ऋश्यमूकपर्वतोपरि पातयति । तत्र सुग्रीवः सचिवसमेतः तमादाय रक्षन् पश्चात् रामाय दर्शयति । इति कथा-

'ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ।
ददर्श गिरिश्रृंगस्थान् पञ्च वानरपुंगवान् ॥"

इत्यारभ्य रामायणे विव्रियते ।

एवं सीतायाः क्षणकालिकस्य सकृत्कटाक्षस्य पात्रभूतः सुग्रीवः । तत्फलत्वेन राज्याधिकं लभते । इत्यहो सीताकटाक्षमहिमा ।

६. वेषः किमर्थम्

रावणो भिक्षुवेषेण जहार जनकात्मजाम् । स्वेनैव रूपेण किमिति

---

५. अस्मिन् लक्ष्मीशतके षट्पंचाशे श्लोके अयमर्थः निगदितः ।

नाजगाम ? किमर्थं वेषधारी बभूव ?

सीतावञ्चनार्थमयं वेष इति समाधानं किंचिदुपपन्नमपि न समग्रतया। सीतादर्शनानुपदमेव तस्या लावण्यं प्रशंसमानः अनतिचिरमेव "अहं स रावणो नाम सीते रक्षोगणेश्वरः" इति याथार्थ्यं प्रकटयति किल ? तर्हि वेषेण किं साधितम् ? सचमत्कारमत्रेदं समाधानम् ।

रावणः स्वकीयं स्वाभाविकमाकारं संछाद्य परिव्राजकाकारेण सीतासमक्षमागच्छत् । तथा च सीतायाः कटाक्षः साक्षाद्रावणस्योपरि नापतत् । किन्तु तच्छरीरस्योपरि स्थितेषु वेषोपकरणेष्वेव । एवं विधिचोदनादेव रावणस्य भिक्षुवेषधारणम् । मनागिदं सूचितं वाल्मीकिनैव—

"द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम्"

इत्यत्र हीतिपदस्य प्रयोगेण ।

एवमेव मारीचवृत्तान्तेऽपि । सीताकटाक्षः मायामृगस्योपरि न्यपतत्, न तु कञ्चुकान्तस्स्थितस्य मारीचस्योपरि ।

एतदुक्तं भवति । येषामायत्यशुभं, ते यद्यपि सीतासमीपमागच्छन्ति, यद्यपि तया दृष्टा भवन्ति, तथाऽपि विधिवशात् सा दृष्टिः तेषामुपरि न पतति, तेषां वेषच्छन्नत्वात् ।

इदमप्यवधेयं यत् यदा रावणः वेषं विना अशोकवने सीतां द्रष्टुम् आगच्छति, तदा सीता तमदृष्ट्वैव तृणमन्तरतः कृत्वा भाषते इति ।

७. सीतापरिष्वङ्गः

जनस्थाने महत् युद्धम् । खरदूषणादिराक्षसानां चतुर्दश सहस्राणि । तेषां प्रतियोद्धा राम एकाकी । युद्धान्ते राक्षसा निहताः । रामो विजयी प्रतिनिवर्तते । अस्य अद्भुतविजयस्य पुरस्काररूपेण सीता रामाय किं ददौ ? निबिडालिङ्गनमेव ।

"तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ।।"

रामायणरसिकाः व्याख्यानकुशलाः श्रीवैष्ववाचार्याः अस्मिन् श्लोके प्रतिपदं गभीरानर्थान् प्रोक्तवन्तः ।

विजयहेतुरपि सीता । विजयफलमपि सीता । इति हन्त साध्यसाधनयोरैक्यम् ।

---

६. अयं वृत्तान्तः लक्ष्मीशतकेऽस्मिन् ५७, ५८ श्लोकयोः प्रकटितः ।

७. इदमस्मिन् लक्ष्मीशतके शततमे श्लोके पादेनैकेन संगृहीतम् ।

८. पावकस्यापि शैत्यम्

हनूमतः लाङ्गूले अग्निर्निक्षिप्तः। रावणाज्ञया हनूमते विहितो दण्डोऽयम्। तेनाग्निना सह लंकायां बहुत्र संचरन् स मारुतिः तत्र तत्राग्निं निक्षिप्य निक्षिप्य लङ्कानगरं दहति समग्रम्। किन्तु स्वयं न दग्धः। "शीतो भव हनूमतः" इति सीतायाः प्रार्थनया अग्निः वस्तुस्वभावविरुद्धं शिशिरोऽभवत्। इति हन्त सीतायाः प्रभावः।

एवमेव सीताया अग्निप्रवेशकालेऽपि सा न दग्धेति नाश्चर्यम्।

"तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि।
अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति॥"

इति किल हनूमतो वाक्यम्।

९. राक्षसीष्वपि दया

अशोकवने सीता। तां परिवार्य घोरा राक्षस्यः। रावणविधेयाः सदा परुषवादिन्यः अनेकधा तामतर्जयन्। अभर्त्सयन्। अपीडयन्। सीता तीव्रं कष्टमन्वभवत्।

रामरावणसंग्रामः संवृत्तः। रावणं हत्वा रामो विजयी राजते। सीतासकाशं हनूमन्तं प्रेषयति। सीतासन्निधिमागतो हनूमान् ताः राक्षसीः हन्तुं सीताया अनुज्ञामीहते।

"इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे।
हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिताः पुरा॥

इति हनूमद्वाक्यं निशम्य सीता

"पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम।
कार्यं करुणमार्येण न कश्चिन्नापराध्यति॥"

इति प्रतिवदति। हन्त तस्याः क्षमा दया च। अत एव

"मातर्मैथिलि राक्षसीस्त्वयि तदैवार्द्रापराधास्त्वयं
रक्षन्त्या पवनात्मजात् लघुतरा रामस्य गोष्ठी कृता"।

इत्याह श्रीभट्टः।

१०. मन्मथमाता

श्रीकृष्णावतारकाले लक्ष्मीः रुक्मिणीरूपेणावततार। रुक्मिण्याः पुत्रः प्रद्युम्नः साक्षात् मन्मथस्य अवतारभूतः। रुद्रकोपात् प्रदग्धो

---

८. अस्मिन् लक्ष्मीशतके ५९ तमे श्लोके इयं कथा स्मर्यते।

९. लक्ष्मीशतकेऽस्मिन् नवमे श्लोके अयं वृत्तान्तो ग्रथितः।

मन्मथ एवं प्रद्युम्नरूपेण शरीरमवाप । इतः पूर्वमपि वासुदेवांश एव किल मन्मथः। प्रद्युम्नो जगति विख्यातः कृष्णतुल्यः शम्बरसूदनश्च । अस्य कथा श्रीमद्भागवते दशमस्कन्धे पठ्यते ।

मन्मथः सर्वानपि वशीकर्तुं समर्थः। ब्रह्मरुद्रविष्णवः अपि तद्वशे स्थिता इति चाटूक्तिः। मन्मथस्य एतावान् प्रभावः कथं सम्प्राप्तः ? तस्य लक्ष्मीसुतत्वात् एव ।

लक्ष्म्याः सकृत्कटाक्षस्य पात्रभूता यदि सकलकुशलसीमासार्वभौमा भवन्ति, तर्हि लक्ष्मीलालितं तत्सुतं प्रति किमु वक्तव्यम् ?

मन्मथस्य सर्वदेहिवशीकरणसामर्थ्यं श्रीदेवीसुतत्वाधिगतप्रभावानुगुणमिति निश्चप्रचम् ।

११. कटाक्षतदुपेक्षे

अमृतमथनावसरे लक्ष्मीरवतीर्णा । तस्या कटाक्षः ब्रह्मादीनां देवानामुपर्यपतत् । भागान्तरस्थाः असुरास्तु तत्कटाक्षं न लेभिरे । फलतः किमभूत् ? इमौ भागवतश्लोकौ—

"श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ।
शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम् ।
निस्सत्त्वा लोलुपा राजन् निरुद्योगा गतत्रपाः ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ।।"

न केवलमिदम् । विष्णुः मोहिनीरूपधरः यदा अमृतं व्यभजत्, तदा दैत्यदानवानां अमृतं नादात् ।

"इति दानवदैतेया नाविन्दन्नमृतं नृप"

अतः न केवलं धनं, किन्तु शीलादिकं आयुरादिकं च सर्वं शुभजातं लक्ष्मीकटाक्षाधीनमित्युक्तं भवति ।

"ऐश्वर्यं यदशेषपुंसि जगतां सौन्दर्यलावण्ययोः
रूपं यच्च हि मंगलं किमपि यल्लोके सदित्युच्यते ।
तत्सर्वं त्वदधीनमेव"

इति श्रीकूरेशसूक्तिः ।

---

१०. अस्मिन् लक्ष्मीशतके ६४-तमे श्लोके अस्य वृत्तान्तस्य संग्रहः ।

११. अस्मिन् लक्ष्मीशतके ८४-तमे श्लोके पूर्वार्धे पूर्वाचार्यसूक्तिपद्धान्येव प्रयुज्य अयमर्थो निगदितः ।

"इदं सदसदात्मना निखिलमेव निम्नोन्नतं
कटाक्ष-तदुपेक्षयोस्तव हि लक्ष्मि तत्ताण्डवम्।
इति श्रीभट्टसूक्तिः ।

१२. गोमाता

एकदा महालक्ष्मीः गोशरीरे क्वचित् वासं रोचमाना गोवृन्दमुपेयाय । गावस्तु चञ्चलायै तस्मै स्थानं दातुं नैच्छन् । लक्ष्मीर्यदा तत्र नित्यवासं कर्तुमङ्गीचकार, तदा गावः परमसन्तुष्टा अवोचन्—"अस्माकं शरीरे तु अनेके अवयवाः पूर्वमेव देवतान्तरैरधिष्ठिताः । योऽवयवो भवत्यै रोचते तमेवाधितिष्ठतु भवती" इति ।

"प्रिया गावः ! भवद्गुदस्थानं ममावासाय भवतु । तत्र मम सान्निध्येन गोमयस्य गोमूत्रस्य च पवित्रत्वं पावनत्वं च संपद्येत" इति लक्ष्मीराह ।

"तथाऽस्तु मातः ! धन्या वयम्" इति गावः अङ्गीचक्रिरे ।

लक्ष्मीः गोगुदमध्यतिष्ठत् । ततः प्रभृति गोगुदस्य मांगल्यं, गोमूत्रस्य शुद्धिश्च समभवत् । वस्तूनां माङ्गल्यपावनत्वादि सर्वं न तु स्वभावसिद्धं, किन्तु देव्या लक्ष्म्याः संकल्पाधीनं किल !

१३. गुरुपङ्क्तौ लक्ष्मीः

"आचार्याणामसावसावित्याभगवत्तः" इति प्रमाणानुसारेण "आभगवत्तः प्रथितामनघामाचार्यसन्तर्ति वन्दे" इति श्रीदेशिकसूक्त्यनुसारेण च श्रीवैष्णवाः स्वाचार्यप्रभृति भगवन्नारायणपर्यन्तमविच्छिन्नामनुस्यूतामाचार्यपरम्परां अहरहस्स्तुवन्तीति तेषामितरवैलक्षण्यम् ।

तत्र शठकोपमुनेराचार्यो विष्वसेनः । तस्य सेनेशस्य आचार्यस्थानम् अलंकरोति भगवती लक्ष्मीः । अत एव दैनंदैनिके गुरुपरम्परानुसन्धानक्रमे "सेनेशं श्रियमिन्दिरासहचर" मिति ।

"सहधर्मचरीं शौरेः संमन्त्रितजगद्धिताम् ।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् ॥"

---

१२. अस्मिन् लक्ष्मीशतके इयं कथा श्लोके ६१ तमे एकस्मिन् पदे संक्षिप्य सूच्यते ।

१३. इदं ७२-तमे श्लोके अस्मिन् लक्ष्मीशतके विव्रियते ।

इति च पठ्यते ।

इदमत्रावधेयम् । ज्ञानाधिका अपि येन केनापि हेतुना बाह्यमतानां कुदृष्टिपथानां च प्रवर्तका भवन्ति कालविशेषेषु । यथा बृहस्पतिश्चार्वाकमतस्य । किन्तु लक्ष्मीर्न तथा । वैदिके सनातने श्रीवैष्णवसंप्रदाये मात्रं सा आचार्यस्थानं वहति । नान्यस्मिन् । अनुग्रहमयी किल सा ।

१४. दिव्यप्रबन्धावतारः

भगवद्भक्तिनिमग्नानां द्वादशद्रमिडकवीनां प्राचीनानां सूक्तयः चतुस्सहस्रगाथामिता दिव्यप्रबन्धनाम्ना विख्याताः । तेषु प्रधानभूतो ग्रन्थः शठकोपमुनेः तिरुवाय्मोषि (लक्ष्मीमुखोक्तिरित्यर्थोऽस्य पदस्य) शठकोपमुनिः कलियुगारम्भकालीनः ।

दिव्यप्रवन्धः वेदस्यैव द्रमिडभाषायां अपरः आकारः इति आचार्याणां निष्कर्षः ।

"सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम्" इति
"धत्ते यत्सूक्तिरूपेण त्रिवेदी सर्वयोग्यताम्" इति

"आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्" इति च बहुत्र उद्घोषितोऽयमर्थः ।

अनेकसहस्रेभ्यस्संवत्सरेभ्यः पश्चात् श्रीमन्नाथमुनिः योगदशायां शठकोपमुनिं साक्षात्कृत्य तत्प्रसादात् दिव्यप्रबन्धं लब्ध्वा देवगानेन संयोज्य लोके प्रचारमकरोत् इति कथा ।

ततः पश्चात् भगवद्रामानुजस्याज्ञया तच्छिष्येष्वग्रगण्यः पिल्लान् नामा तिरुवाय्मोषिग्रन्थस्य षट्सहस्रग्रन्थमितां व्याख्यां प्रप्रथमं चकार ।

सर्वमिदं लक्ष्मीकैंकर्यरूपम् ।

१५. गोदादेवी

द्विसहस्रसंवत्सरेभ्यः पूर्वतना कथेयम् ।

पाण्ड्यदेशे श्रीविल्लपुत्तूरु नामकं क्षेत्रमस्ति, यत्र भगवतः श्रीवटपत्रशायिनः आलयः प्रसिद्धः । तत्र विष्णुचित्तनामा भक्ताग्रेसरः भगवते पुष्पकैंकर्यं कुर्वाण आसीत् । यश्च 'आल्वार्' इति प्रसिद्धेषु विष्णुभक्तेषु अन्यतमत्वेन गण्यते ।

---

१४. इति वर्ण्यते ६६-तमे श्लोके ।

एकदा स्वकीये उद्याने तुलसीवने स्त्रीशिशुमेकं ददर्श सः । तल्लक्षणैरियमयोनिजाऽतिविलक्षणाऽस्माकं भाग्यवशादत्रावतीर्णेति निश्चिकाय । गृहमानीय लालनपालनादिभिः पोषयति स्म । सा च गोदा-संज्ञिका सदा भगवति रता, तमेव परिणेतुमुत्सुकाऽभवत् ।

तत्कृतयः द्रविडगाथाः दिव्यप्रबन्धान्तर्गताः । त्रिशंत्-गाथात्मकः तिरुप्पावै (श्रीव्रत) प्रबन्धः उपनिषत्तुल्यतया सर्वैराचार्यैराद्रियमाणो विलसति ।

भक्तवत्सलो भगवानपि गोदायाः प्रेम अंगीकुर्वन्निव, तन्मस्तकधृतमालामेव स्वयं धर्तुमौत्सुक्यमदर्शयत् । तस्याः प्रेम्णः उत्कटदशायां हन्त तामेव पर्यणयच्च ।

अत्यद्भुतमर्चासमाध्यतीतमिमं वृत्तान्तं दृष्ट्वा श्रुत्वा च जना विस्मयभरिता बभूवुः । नूनं लक्ष्मीरेव गोदारूपेणावतीर्णेति निरणैषुः ।

१६. नाथमुनिचरित्रे देव्या अनुग्रहः

श्रीमन्नाथमुनिः भक्तियोगनिष्ठः योगमहिम्ना दीर्घायुश्च (५८३-९२५ ए० डी०) स कदाचित् योगदशायां श्रीशठकोपमुनिध्यानपर आसीत् । तदा श्रीदेवी स्वप्रशिष्यं शठकोपमुनिमेवमाज्ञापयत् —

"अस्मिन् कलिकाले भक्तियोगाधिकारिणो दुर्लभाः ।

'भक्त्या परमया वाऽपि प्रपत्त्या वा महामते' इति विकल्पितस्य प्रपत्तियोगस्य आविष्कारणायायमवसरः प्राप्तः । नाथमुनिः भवद्ध्यानपरो वर्तते । भवान् तत्प्रत्यक्षभूतस्सन् प्रपत्तिशास्त्रं तन्मुख्यकरणभूतं मन्त्ररत्नं तदुपयुक्तांशान् च तस्मै उपदिशतु । तदनुष्ठाय अन्यानपि अनुष्ठाप्य वर्तितव्यमिति स नियोज्यः । अविच्छिन्नया आचार्यशिष्यसन्तत्या लोकोज्जीवनमुद्दिष्टम्" इति ।

एतदाज्ञानुसारं शठकोपमुनिरपि तथैवाकरोत् ।

"लक्ष्म्या नियोगतः पूर्वं कुरुकाधीशकारिजः ।

---

१५. इयं गोदादेवी तस्याः श्रीव्रतप्रबन्धश्च प्रथमे श्रीव्रतदले विशिष्य च ३, ४ श्लोकयोः गद्येते ।

१६. अयं वृत्तान्तोऽस्मिन् ग्रन्थे ७८-तमे श्लोके सूचितः ।

मन्त्ररत्नमदाद्यस्मै" इति

"व्योम्नः परस्तात् सविधं समेत्य
लक्ष्म्या नियोगात् कुरुकाधिराजः ।
स मन्त्ररत्नं द्वयमाह यस्मै
नाथाय तस्मै मुनये नमोऽस्तु ।।"

इत्युक्तरीत्या लक्ष्मीनियोग एव शरणागतिसंप्रदायावतरणहेतुः ।

१७. यामुनमुनये लक्ष्म्या अनुग्रहः

श्रीश्वरभट्टः श्रीमन्नाथमुनेः पुत्रः । तस्य पुत्रः यामुनः कल्यब्दे ४०१७-तमे (९१५ ए.डी.) अजनि ।

यामुनस्य शैशवे महालक्ष्मीरतिवात्सल्येन तस्मै सकृत् स्तन्यमदात् । येन हेतुना बाल्य एव स लोकातिशायिज्ञानविशिष्टो विरराज । वेदान् शास्त्राणि चातिशीघ्रमधिजगाम । राजसभाप्रधानपण्डितं स्वमेधया वादे विजित्य राज्ञ्याः अभिमानपात्रमभवत् । यामुनस्य राजसभावाद-वैखरीप्रकारः अतिविलक्षणो ग्रन्थारूढोऽद्यापि पठितृणामाह्लादकः । येन राज्यार्धमपि तस्य वशेऽभवत् । परन्तु पश्चात् स राज्यसुखादधिकं भगवदनुभवरसं विज्ञाय तल्लग्नोऽभवत् ।

आगमप्रामाण्यप्रभृत्यनेकग्रन्थानां रचयिता चायं यामुनार्यः भगवद्रा-मानुजस्य प्राचार्यः । अपि च यामुनार्यपुत्रस्य दौहित्रः रामानुजः । अत एव लक्ष्मीविषयिकगद्यचूर्णिकायां 'अखिलजगन्मातरम् अस्मन्मातरम्' इति स्वस्य यामुनमुनिवंशजननतः विशिष्टाकारेण लक्ष्मीर्माता भवतीति आशंसते ।

यामुनाचार्यश्च 'कान्तस्ते पुरुषोत्तम' इत्यारभ्य लक्ष्मीविषयिकां चतुश्श्लोकीं व्यरचयत् । या चाद्य भारते श्रीवैष्णवसमूहे सुप्रसिद्धा नित्यानुसन्धीयमाना च ।

पश्चात् यामुनाचार्यस्यैव वंशे जाताय अपरस्मै शिशवेऽपि एवमेव लक्ष्म्याः अनुग्रहोऽभवत् (प्रायः १५७२ A.D.) सः लक्ष्मीकुमारताता-चार्य इति नाम्नैव प्रसिद्धोऽभवत् ।

---

१७. कथेयमस्मिन् लक्ष्मीशतके ६२, ६३, ६४, ७३ इति श्लोकेषु वर्णिता ।

१८. ताताचार्यकथा

सहस्राधिकसंवत्सरेभ्यः प्राक् श्रीवेङ्कटाचलक्षेत्रे भगवतः श्रीनिवासस्य कैंकर्ये निरतः श्रीशैलपूर्णनामा भक्ततल्लजः। भगवन्नियमनेन प्रतिदिनमाकाशगंगानदीतः जलमादाय आतपकण्टकादिजन्यं खेदं सोढ्वा पद्भ्यामेव सुदूरं चलन् भगवते वेङ्कटेशायार्पयति स्म।

एकदा भगवान् बाणहस्त (किरात) बालवेषेण पथि जलमाहरन्तमिमं संगम्य संबभाषे।

बालः - मम पिपासाऽधिका। जलं दीयताम् तात!

पूर्णः—भगवते उद्दिष्टमिदम्। तुभ्यं दत्वा तदुच्छिष्टं भगवतेऽनर्हं स्यात्।

बालः—तर्हि गम्यताम्।

किन्तु स बालः पश्चात्तः आगम्य शिरस्स्थघटे आस्यं न्यस्य जलमपिबत्।

पूर्णः—किमेतत् कृतं बाल !

बालः—मास्तु कोपः। पिपासा अधिका। अतः पिबामि।

पूर्णः—(घटं भूमौ निक्षिप्य) यथारुचि पिब।

बालः—(समग्रं पीत्वा) तृप्तोऽस्मि।

पूर्णः—पुनराकाशगंगां गत्वा स्नात्वा घटं विशोध्य भगवते तीर्थमादायागन्तव्यम्।

बालः—तावद्दूरं न गन्तव्यम्। आकाशगंगामत्रैवानयामि (तस्य बाणेन विद्धात् गिरेः स्रोतः प्रवहति)

पूर्णः—नूनमियमाकाशगंगैव। तान्येव चह्लानि। अहो !

अतित्वरया जलमादाय देवालयं गच्छति पूर्णः किन्तु तत्र भगवदाराधनं समाप्तं दृष्ट्वा विषीदति। भगवानावेशरूपेण "तात ! उत्तिष्ठतु भवान्। अलं सन्तापेन। भवतस्तीर्थं मार्गे एवापिबमहम्। भवदर्थं नदीं च समीपे आनयम्। अपि च भवन्तं तातेत्याह्वयम्।" ततः प्रभृति सः तद्वंशीयाश्च ताताचार्यपदेन व्यवह्रियन्ते।

---

१८. इयमस्य कथा लक्ष्मीशतकेऽस्मिन् ६५-तमे श्लोके संक्षिप्ता।

अयं श्रीशैलपूर्णो भगवतो रामानुजस्याचार्येष्वन्यतमः। श्रीमद्रामायणस्य विशेषार्थानस्य सकाशादष्टादशकृत्वः पठित्वा जग्राह रामानुज इत्यैतिह्यम्।

अनुसन्धीमहि च—"पितामहस्यापि पितामहाय
प्राचेतसादेशफलप्रदाय ।
श्रीभाष्यकरोत्तमदेशिकाय
श्रीशैलपूर्णाय नमो नमस्तात्" इति।

लक्ष्मीनिवासकैंकर्यशीलोऽयं पूर्णः सीताचरित्रविशेषार्थप्रवक्ता।

१९. रामानुजमुनिचरित्रे कश्चनांशः

चोलदेशे श्रीरङ्गक्षेत्रे लक्ष्म्याः श्रीरङ्गनायिकाया आलयेऽलंकृतः मण्डपः। फाल्गुनपौर्णमीशुभदिवसः। श्रीरङ्गनाथः लक्ष्म्या सह तत्रोत्सवं भजते। भगवान् रामानुजः स्वशिष्यवृन्देन साकं शरण्यदम्पतीसेवार्थमागतः। ध्यानमग्नः तदेकचित्तः ताभ्यां सह संभाषमाण इवासीत्। तदानीं तन्मुखादाविर्भूतः ग्रन्थः शरणागतिगद्यमिति। अतिसरलमिदं गद्यम् अतिमधुरं च। पामरस्यापि भक्तिजनकं पण्डितस्यापि भोग्यम्।

प्रतिसंवत्सरमद्यतनकालेऽपि एतद्वृत्तान्तस्मारणरीत्या फाल्गुनीपौर्णमीदिने दिव्यदम्पत्योस्संमुखे गोष्ठीगानरूपेण पठ्यते शरणागतिगद्यमिदम्। तत्र प्रथमचूर्णिका लक्ष्मीविषयिका—

"भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां
पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं
निरवद्यां देवदेवदिव्यमहिषीमखिलजगन्मातरं
अस्मन्मातरमशरण्यशरण्यामनन्यशरणश्शरणमहं प्रपद्ये" इति।

२०. श्रीपराशरभट्टः

भगवतो रामानुजस्य प्रशिष्योऽयं प्रकाण्डपण्डितः लक्ष्म्याः श्रीरङ्गनायिकायास्तीव्रभक्तः। श्रीगुणरत्नकोशग्रन्थरचयिता। सः स्वान्तेवासिनः लक्ष्म्युत्कर्षं बहुधा बोधयति स्म।

---

१९. अयं वृत्तान्तो लक्ष्मीशतकेऽस्मिन् ७४-तमे श्लोके निर्दिश्यते।

"श्रियं त्वत्तोऽप्युच्चैर्वयमिह भणामः शृणुतरा" मिति रंगनाथं संबुध्य उदघोषयत् ।

"ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति रीत्या श्रियः पतित्वमेव परतत्त्वनिर्धारकम् । अन्यर्लिगैर्मन्दमतीनां निर्धारणाभावात् । अतः

"वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति" इत्याह । न केवलमिदम् । हरेः परत्वमेव लक्ष्मीकटाक्षायत्तमिति स्पष्टमाह—

"अपाङ्गा भूयांसो यदुपरि परं ब्रह्म समभूत्
अमी यत्र द्वित्रास्स च शतमखादिस्तदधरात्" इति ।

अस्मिन् लक्ष्मीशतके क्वचित् श्रीभट्टप्रयुक्तानां पदानां तथैव प्रयोगः क्रियते । क्वचित् तदर्थानां चानुवादः क्रियते ।

अस्य श्रीपराशरभट्टस्य पिता श्रीकूरनाथः (श्रीवत्सांकमिश्रः) श्रीस्तवस्य रचयिता ।

२१. वेदान्तदेशिकचरित्रे कश्चनांशः

श्रीवेङ्कटनाथार्यः सप्तशतवत्सरेभ्यः पूर्वं श्रीरङ्गक्षेत्रे निवसतिस्म । कवितार्किकसिंह, वेदान्तदेशिकः इत्यादि विरुदैर्विशिष्टोऽयम् । तत्क्षेत्रमागतः कश्चन दरिद्रब्रह्मचारी तत्रत्यानाढ्यान् स्वविवाहार्थं धनं ययाच । तेषु केचन श्रीवेंकटनाथस्य कीर्तिमसहमानाः तमवमन्तुमनसः तद्गृहं प्रदर्श्य याचकमूचुः "एतद्गृहस्वामी धनिकः । दाता च । अभीष्टं भवते देयात्" इति । वस्तुतस्तु श्रीवेंकटनाथोऽपि परमदरिद्रः धने निस्स्पृहश्च । तमुपेत्य स ब्रह्मचारी यथावत् सर्वमाचचक्षे । कृपालुराचार्यः "यद्येवमेतत्क्षेत्रवासिभिः भागवतैश्चोदितः तन्नियमनेन भवान् मामुपागतः, तर्हि नैष मोघो भवेत्" इत्युक्त्वा महालक्ष्मीविषयिकां श्रीस्तुतिं 'मानातीतप्रथितविभवा"मित्यारभ्य मन्दाक्रान्तावृत्तेन प्रणिनाय । श्रीश्चास्य भक्त्या भागवतप्रावण्येन निस्स्वार्थतया च सन्तुष्टाऽभवत् ।

"तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा

---

२०. इमेऽर्थाः ८२, ८५ तम श्लोकयोः द्रष्टव्याः ।

धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम्"

इति पठनावसरे हन्ताश्चर्यम्। आकाशात् कनकधाराया वर्षः। अहो महालक्ष्म्याः करुणा। आचार्यस्तु तत्सर्वं ब्रह्मचारिणे प्रादात्। स चास्य माहात्म्यवेदी प्रणम्य निर्जगाम। तच्चोदकाश्च एतदीयं प्रभाव विदित्वा सलज्जाः एनं प्रणम्य अपचारक्षामणमकुर्वन्।

तुण्डीरमण्डले काञ्चीक्षेत्रे लक्ष्म्या महादेवीनाम्न्याः सन्निधौ प्राकारभित्तौ एकं चित्रं लिखितमद्यापि दरीदृश्यते यस्मिन्नयं वृत्तान्तः चित्रितः।

२२. वेदान्तदेशिकचरित्रे अन्योंऽशः

कवितार्किककेसरी वेङ्कटनाथः श्रीरंगनाथेन 'वेदान्तदेशिक' इति दत्तविरुदः। श्रीरङ्गनायिका चास्मै सर्वतन्त्रस्वतन्त्र इति विरुदमनुजग्राह।

"तत्प्रेयस्या सर्वतन्त्रेषु दाक्ष्यं
दत्तं यस्मै प्रीतया देशिकाय" इति
"लब्धवेदान्तगुर्वाख्यो रङ्गराजाज्ञया गुरुः।
सर्वतन्त्रस्वतन्त्राख्यां स भेजे तत्प्रियाज्ञया" इति चाहुः।

लक्ष्मीदत्तत्वादेवास्य बिरुदस्य, सः गुरुः शिल्पशास्त्रकूपनिर्माणादिष्वपि स्वनैपुण्यमाविरकरोत् पश्चात्तनसन्दर्भेषु।

२३. लक्ष्मीलोलनरसिंहः

आन्ध्रदेशे श्रीमदहोविलक्षेत्रे नवनरसिंहानामालयः। नव नृसिंहेष्वन्यतमः श्रीमालोलनरसिंहः। प्रायः षट्शत संवत्सरेभ्यः प्राचीना कथेयम् श्रीवण्शठकोपनामा मुनिः ज्ञानानुष्ठानवैराग्यशेवधिरासीत्। तस्य स्वप्ने मालोलनरसिंह एवमाज्ञापयत् —

"मम उत्सवमूर्तिमादाय भवान् ग्रामे ग्रामे पर्यटतु। दिव्यविग्रहस्य आराधनं दैनन्दैनिकं भवानेव करोतु। बहुजनानुग्रहकुतूहली अहम्" इति।

---

२१. इयं कथा लक्ष्मीशतकेऽस्मिन् ७५-तमे श्लोके वर्णिता।

२२. अयं विषयः लक्ष्मीशतकेऽस्मिन् ७८-तमे श्लोके सूच्यते।

स च मुनिः अहोविलमठं संस्थाप्य श्रीमालोलनृसिंहाराधनपरो भारतदेशे बहुत्र संचार्य सिद्धान्तस्थापनं जनसंघानुग्रहं च कुर्वाण आसीत्। सेयं वृत्तिरद्याप्यनुस्यूता। यदहोबिलमठे मूर्धाभिषिक्तः अद्यतनयतिरद्यापि मालोलनृसिंहाराधको बहुत्र संचरतीति।

प्रसिद्धदिव्यदेशालयस्य मूर्तिरेवं संचरतीत्यपि विलक्षणमेव। न कुत्रचिदप्यन्यत्रैवं दृश्यते। भगवन्नियमनं शास्त्रानुमतेरपि बलीय इति महान्तोऽप्याहुः।

एतादृशी अभूतपूर्वा कृपा मालोलनृसिंहस्य कथमुत्पन्ना? लक्ष्मीलोलः किल सः? दयासमुद्रभूताया लक्ष्म्याः प्रेरणैवैतत्सर्वम्।

२४. कोमलवल्ली देवी

श्रीकुम्भघोणक्षेत्रं चोलदेशे। श्रीशार्ङ्गपाणेरालयः। तत्र अर्चारूपिण्या लक्ष्म्या नाम कोमलवल्लीति।

क्रैस्तवीयाष्टादशशताब्दे 'नायक' राजानः चोलदेशपालका अभवन्। राजपुरोहितः श्रीकुमारतातार्यः। स्वगुरौ तातार्ये अत्यन्त भक्तिमान् राजा। नृपसाह्येन श्रीतातार्यः कोमलवल्लीदेव्यै पृथक् सन्निधिं निरमापयत्। तेन सुतरां प्रसन्ना लक्ष्मीः। एकाञ्जलिमात्राय सर्वाभीष्टदायिनी किल सा। आश्चर्यमिदं यत् सा राजानं चोदयामास गुरवे कुमारतातार्यायापि सन्निधिमेकं निर्मातुम्। राजाऽपि तथैवाकरोत्। अधुनाऽपि तस्मिन् देवालये संदृश्यते तातार्यस्य सन्निधिः नित्यपूजाविधानं च तत्र। अहो मातुः करुणा!

२५. हयवदनाङ्कलक्ष्मीः

श्रीवैष्णवसिद्धान्ते प्रख्याता आचार्या अनेके। तेषामाराध्यदैवतं प्रायः लक्ष्मीनरसिंहलक्ष्मीहयग्रीवयोरन्यतर एव। सिद्धान्ताभिवृद्धये आराध्यदेवस्य अङ्कस्थिता लक्ष्मीर्नितरामनुगृह्णातीति तत्त्वम्।

तुण्डीरमण्डले नावल्पाक्कग्रामे चतुर्वेदशतक्रतुकुलतिलकभूतः

---

२३. लक्ष्मीशतकेऽस्मिन् ७७-तमे श्लोके इदमाख्यानकं ग्रथितमस्ति।

२४: अयं वृत्तान्तः लक्ष्मीशतकेऽस्मिन् ६८-तमे श्लोके संगृहीतः।

प्रायस्सार्धशतसंवत्सरेभ्यः पूर्वंमण्णयार्यमहादेशिक नामा (१७९१-१८६३ A.D.) प्रसिद्ध आसीत्।

स कदाचित् पूर्वोदधितीरवर्तिनि श्रीस्थलशयनक्षेत्रे श्रीज्ञानवराह-सन्निधिसविधे पुष्करिणीजले आकण्ठमग्नस्तिष्ठन् तीव्रव्रतानुष्ठानं संकल्प्य उचितैर्नियमैस्सह हयग्रीवमन्त्रावृत्तिं कुर्वाणस्तपस्तेपे।

तेन प्रसन्नो हयग्रीवः तस्य स्वप्न इवाविर्भूय "प्रीतोऽस्मि। व्रतं समाप्यताम्। ज्ञानसमृद्धिर्भवेत्। अर्चारूपिणं लक्ष्मीहयग्रीवमाराध्य उत्तरोत्तराभिवृद्धिं भजस्व" इत्यनुगृह्णात्।

तेनाराधितो लक्ष्मीहयग्रीवः अद्यापि तदनुवन्धिभिराराध्यमानः नावल्पाक्कग्रामे ज्ञानसमृद्धिहेतू राजते। तदङ्कस्थिता लक्ष्मीः अस्मान् अधिकमनुगृह्णाति च।

२६. अष्टलक्ष्म्यालयः

मद्रास्नगरे वसन्तनगराभिधः समुद्रतीरप्रदेशः।

अस्मत्समकालीनेयं नवीना कथा।

करुणामयी लक्ष्मीः कंचन भाग्यशालिनं नरं संचोद्य एकमालयं स्वस्मै स्वप्रीतये स्वयमेव निर्मापितवती।

यत्र चाष्टधा रूपमादाय ओंकारविमानमध्यस्था आगमविद्भिः पण्डितैराराध्यमाना सती अस्मान् कृपया पालयति।

या चेयं मामपि एतद्ग्रन्थनिर्माणे सज्जनद्वारा नियुनक्तिस्म। या च महज्जनद्वारैव स्वकीयालये एतद्ग्रन्थ (लक्ष्मीशतक) एकदेशं शुश्राव जनानश्रावयच्च।

अस्याः कीर्तनमसकृत् क्रियतेऽस्मिन् स्तोत्रे।

---

२५. इदमस्मिन् लक्ष्मीशतके ६९-तमे श्लोके ज्ञापितम्।

२६. अर्वाचीनतममिदमाख्यानकं लक्ष्मीशतकेऽस्मिन् ७, ८, १०, १५, ३५ आदिषु श्लोकेषु निबद्धमस्ति।

श्रीगङ्गावन्दनम्

(डा० रामकिशोर मिश्रः, म०मा०डिग्री कालेजः
खेकड़ा २०११०१)

गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।

भागीरथीं त्रिपथगां प्रणमामि गङ्गाम्,
त्रिस्रोतसं जगति जह्नुसुतां च वन्दे ।
आयासि देवि ! हिमपर्वतो धरित्रीम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१॥

विष्णोः पदाज्जननमाप्तवती त्वमेव,
तस्माद् बुधैर्जगति विष्णुपदी त्वमुक्ता ।
स्वच्छं शुभं त्वमरजीवनदं जलं ते,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२॥

निस्सृत्य विष्णुचरणादधिकन्तु कालं,
स्रष्टुः कमण्डलुगता भ्रमणं ह्यकार्षीः ।
ब्रह्मा तवाऽमृतजलं त्वपिबत्प्रसन्नः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥३॥

तस्मात्कमण्डलुमुखाद् बहिरागता त्वं,
देवि ! स्ववासमकरोः स्वशिवाऽलकेषु ।
देवापगा सुरनदी सुरनिम्नगा त्वम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥४॥

भागीरथेन तपसा भवती प्रसन्ना,
तस्याऽन्वये सगरषष्टिसहस्रपुत्रान् ।
तानुद्धधार कृपयोद्धर भारतं माम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥५॥

हे देवि ! सिञ्चसि पवित्रजलेन देशे,
प्राचीपयोधिमितभारतमातृभूमिम् ।
रत्या पतिं च सरितामुपयासि भद्रे,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥६॥
जीवाणुजीवनवती सुरनिम्नगे ! त्वं,
धारा जलस्य तव देवि ! विषाणुहन्त्री ।
एष त्वदीयजलगन्धकतत्त्वसारः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥७॥
स्वर्गे च भूमिविवरे च वसुन्धरायां,
तिस्रो वहन्ति सुभगे ! तव नीरधाराः ।
तस्माद् बुधैस्त्रिपथगा गदितासि शुभ्रे,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥८॥
सत्त्वं रजस्तम इति त्रिगुणप्रदासि,
तत्सद्गुणोऽस्ति तव भक्तजनेषु भक्तिः ।
तैर्मोक्षदा मृतवती सुखदा त्वमुक्ता,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥९॥
पत्न्यो नवाश्च पतयश्च विवाहिता ये,
कुर्वन्ति ते तव तटं प्रगतास्तु पूजाम् ।
तत्प्रेम सिञ्चसि रजस्तरसा गृहेषु,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१०॥
तीरस्थितानि नगराणि निपातयन्ति,
मूत्रं मलं च तव निर्मलशम्बरेऽस्मिन् ।
तस्मात्तमःप्रदरसं प्रददासि देवि,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥११॥
ये स्नान्ति देवि ! मनुजास्तव शुभ्रतोये,
तेषामपुण्यनिकरं हरसे त्वमेव ।
मातासि भारतमहीसुरवंशजानाम्
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१२॥
शक्त्याऽमृतस्य तव भारत उत्तरस्यां,
क्षेत्राणि शस्यभरितानि फलैर्युतानि ।
धान्यप्रदा कृषकजीवनदा सुभङ्गे !
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१३॥

मृत्युं गतस्य हि जनस्य मुखे जलं ते,
दाहात्पुरो गृहजना विनिपातयन्ति।
मोक्षप्रदं तदमृतं सलिलं त्वदीयम्,
गङ्गे! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१४॥
द्वार हरेः प्रथितमत्र च रामघट्टः
सोरोंपुरी तदिह कर्णपुरं प्रयागः
वाराणसी शिवनिवासपुरी च काशी,
तीर्थानि देवि! तव तीरगतानि गङ्गे।१५॥
वङ्गाच्च मालवपुरेभ्य इहाऽङ्गपूर्भ्य
आयान्ति देवि! पुरुषा बहुदूरदेशात्।
ते त्वां नमन्ति च रजस्तव धारयन्ति,
शान्तिप्रदं तव जलं ह्यमृतं च गङ्गे!॥१६॥
त्वं शान्तिदा शमनदासि च तृप्तिदासि,
शीर्षं विषस्य शमनाय शिवेन नीता।
प्राप्ता प्रशान्तिरिह शीतजलेन तेन,
गङ्गे! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१७॥
ऐश्वर्यमस्य जगतः परिहाय गङ्गे!
पीयूषतुल्यजलमद्य पिबामि तेऽहम्।
प्राप्तिर्जलस्य तव पुण्यकृतां हि देवि!
गङ्गे! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१८॥
ते भाग्यशालिमनुजाः खलु सन्ति विश्वे,
ये प्राप्नुवन्ति सुखदं शुभदर्शनन्ते।
पूतेन मां स्वसलिलेन पुनीहि देवि!
गङ्गे! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१९॥
त्वां याचते सुतवरं पतिरात्मपत्न्याम्,
पुत्रीं च काऽपि गृहिणी स्वपतेस्तनूजाम्
त्वां प्रार्थयन्ति निजकामनया मनुष्याः,
तत्कामनां झटिति पूरयसीह गङ्गे! ॥२०॥
पुत्रं प्रसूय जननी तव तीरमेत्य
स्नाता च मुण्डयति तं स्वसुतं त्वदप्सु।
तस्याऽलकानपि च वाहयति स्वभक्त्या,
गङ्गे! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२१॥

आरुह्य यं मकरमत्स्यमहो ! प्रयासि,
जीवान् स भक्षयति सन्तततोयजातान् ।
तत्स्वास्थ्यवर्धकपयस्तव दुग्धतुल्यम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२२॥

भक्तास्त्वदीयममृतं सलिलं निपीय,
देवा इवाऽत्र भुवने ह्यमरा भवन्ति ।
ते धारयन्ति तिलकं तव मृत्तिकायाः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२३॥

कुर्वन्ति ते तटगता जयकारशब्दान्,
मातः ! प्रपाहि, जय देवि ! सुखप्रदासि ।
भोगप्रदासि सुतदासि नमोऽस्तु तुभ्यम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२४॥

स्नामि, त्वदीयममृताम्बु मुदा पिबामि,
स्वे मस्तके तव रजस्त्वपि धारयामि ।
भक्तिं प्रदाय भुवि माममरं कुरुष्व,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२५॥

आचार्यवर्यकविरामकिशोरमिश्रो
यद् वन्दनं व्यरचयत्सुरनिम्नगायाः ।
तत्पाठकाय भुवि या हि सुखानि दत्ते,
सर्वान् सदा स्वपयसा खलु पातु गङ्गा ॥२६॥

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी
कालोदधिखात्माब्दे(२०४३) गङ्गादशमीदिवसे धीमान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
श्रीगङ्गावन्दनमिति काव्यं वसन्ततिलके कृतवान् ॥२७॥

शिमला

(आचार्य श्रीनिवास रथः, उज्जयिनी)

गौरीगुरोः प्रदेशे विमला
शिमला सपदि मनो हरते ॥

(१)

सस्मितमधुरवधूवचनानि
अथवा केशकलितकुसुमानि
उपर्युपरि परितः प्रतिशिखरं
खचितानि तथा भवनानि
शरणागतजनतापहारिणी
सुखदं तपनातपमपि तनुते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो हरते ॥

(२)

क्षेत्रपंक्तिसोपानविधानम्
भवति पर्वतानां परिधानम्
सरलद्रुमराजीविराजिता
मनसि जनानां परा सरलता
खेलतीव सर्पति लघुयानम्
दरीं निविशते दरीदृश्यते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो हरते ॥

(३)

यज्ञोपवीतसूत्रोपमिता
क्वचिदपि काञ्चीगुणमिव घटिता

उरगाश्रितपशुपतितनूपमा
प्रसरति सरणिदीपिता सुषमा
हनूमता विश्रामसत्कृता
सञ्जीवनीप्रसादं भजते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो रमते ॥

(४)

स्मरति पार्वतीलास्यमहत्त्वं
जानीते शिवताण्डवतत्त्वम्
रक्षति कालक्रमोपनीतं
परिचिनोति किन्नरसङ्गीतम्
हिमाचलपरम्परापोषितां
शान्तिसम्पदं सदा कलयते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो हरते ॥

हम भारतवासी

अपने गणतंत्र के महान आदर्शों

लोकतंत्र
समाजवाद
धर्म-निरपेक्षता
न्याय
स्वतंत्रता
समानता
भ्रातृत्व
सद्भावना
एकता
अखंडता
शांति
उन्नति

के प्रति समर्पित हैं

हम इनके प्रति सदा ही
वचनबद्ध रहेंगे

आकाशवाण्याः समस्तकेन्द्रेभ्यः २५.१.१९८७ ई० तारिकायां रात्रौ ६.४५ वादनकाले प्रसारिते सर्वभाषाकविसम्मेलने पठिता संस्कृतकविता

अहं स्वतन्त्रता भणामि

(डा० रमाकान्त शुक्लः, आर ६, वाणी-विहारः, नयी दिल्ली-११००५९)

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम् ।
निधाय मानसे च तद् यथोचितं विधीयताम् ।।
अहं स्वतन्त्रता भणामि .... ।

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः ।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गता त एव मे जना सदैव वन्दनीयताम् ।।
अहं स्वतन्त्रता भणामि...... ।।

(२)

भवद्भिरन्तरिक्षगा जनाः स्वदेश ईक्षिताः,
भवद्भिराततायिनाशकारिणोऽपि दीक्षिताः ।
कृतं भवद्भिरेशियाद्व्यशीतिखेलयोजनम्,
तवेतदर्थमद्य मे शुभेहितं प्रगृह्यताम् ।।
अहं स्वतन्त्रता भणामि...... ।।

(३)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः ।
भवभिद्रद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम् ।।
अहं स्वतन्त्रता भणामि...... ।।

आकाशवाणी द्वारा २३·१·१९८७ को भोपाल में आयोजित तथा
२५·१·१९८७ को दिल्ली से प्रसारित
सर्वभाषा कवि सम्मेलन में प्रस्तुत ~~संस्कृत~~ कविता

मैं स्वतन्त्रता तुम्हें पुकारती !

('अहं स्वतन्त्रता भणामि' का हिन्दी काव्यानुवाद)

(रूपान्तरकार-श्री कृष्णमुरारि शर्मा, विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु आश्रम, होशियारपुर, पंजाब)

मैं स्वतन्त्रता तुम्हें पुकारती सुनो।
सोचकर हृदय वितान कर्म के बुनो।

अर्चना-पलों में जो शिरों की भेंट दे गये।
देह-गेह सौंप हर्ष पूर्ण चित्त से गये।
गोलियाँ सही जिन्होंने आत्म वक्ष पर सदा
जो रहे सदैव ही नृवीर देश की गदा।

उन्हीं महान् वन्दनीय के चरित गुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१॥

अन्तरिक्ष में विहार के समर्थ जन यहाँ।
देखते रहे सुपुत्र! दुष्टता-दलन यहाँ।
इस शती में एशिया-बयासी खेल-योजना
सफल, चिरायु देश के लिए हैं भद्रभावना।

नित्य नव सृजनमयी सुकल्पना ठनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥२॥

आज जो समुन्नति निहारते सहर्ष हो।
आज जो भी निर्मिति सँवारते प्रकर्ष हो।
आज रस स्वतन्त्रता समोद पान कर रहे।
आज जो दिगन्त कोटि कण्ठ गान कर रहे।

अहो! वरेण्य चेतना-पलो! अमृत बनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥३॥

(४)

शुभा हि कामनाः भवत्कृते समर्पयाम्यहम्
समुन्नतिं सुखं च वः सदैव चिन्तयाम्यहम् ।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

(५)

मया न कल्पितं कदापि दुर्बलाभिशोषणम्,
मया न कल्पितं कदापि दुर्जनाभिपोषणम् ।
मया न कल्पितं कदापि सज्जनावमाननम्,
सहेऽखिलं च च तद् यथा सहे न, तद्विधीयताम् ।।
अहं स्वतन्त्रता भणामि…… ।।

(६)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा ।
नतानना गतासुका भवाम्यहं तदा तदा ।
इयं दशा न मेऽस्तु येन, तत्सदा विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(७)

यदा यदा शृणोम्यहं वधूविदाहपातकम्,
यदा यदा शृणोम्यहं बलात्कृतिं विहिंसनम्,
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता ।
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्;
पृथक्त्वभावपोषणं स्वदेशदेहदारणम् ।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि, सा द्रुतं विलोप्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

दे रही तुम्हें अरे अनन्त भद्र कामना।
शान्ति सुख समृद्धि के लिए उदार भावना।
परन्तु दैवयोग से विचित्र काल आ गया।
युग-युगों की एकता अभाग्य हाय! खा गया।
चिन्तनीय पल, परन्तु शीश ना धुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।४।।

नहीं थी कल्पना अबल कि इस तरह भी रोयेंगे।
और कुकर्म रत मनुज ऊंचाइयों में खोयेंगे।
नहीं था भान सत्य-पथ में शूलमात्र छायेंगे।
भोले देश जन कहो, दुआर किसके जायेंगे।
सह चुकी बहुत, न और यूँ निठुर बनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।५।।

देखती हूँ वृत्तिहीनता अहो मैं जिस समय।
देखती हूँ नीतिहीनता अहो मैं जिस समय।
शर्म से नतानना मैं दीखती हूँ उस समय।
और प्राणहीन सी मैं दीखती हूँ उस समय।
यह दशा निवारदो सुकर्मपथ चुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।६।।

है अपार वेदना, वधू के अग्निदाह से।
दुःख है असह्य, हिंसा और छल की राह से।
हठात् भ्रष्ट आचरण और ना सहूँगी मैं,
चुप रही भले मगर, आज सब कहूँगी मैं।
रोक दो प्रवाह यह, तुम्हीं शिला तनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।७।।

आप ही करें सभी जो नष्ट भ्रष्ट हाथ से।
पार्थक्य भावना से होंगे सब अनाथ से।
बिक रहा हो ज्ञान, जन दबा करों के भार से।
व्यक्ति स्वार्थ मुख्य, भाव भूलता समस्त का।
दुर्दशा जनित जो दुःख ताप तुम हरो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।८।।

(९)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे ।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे
इयं दशा समर्थनं किमर्हतीति चिन्त्यताम् ।।
अहं स्वतन्त्रता भणामि...... ।।

(१०)

दलाद् दले पलायनं, प्रवञ्चनां क्षणे क्षणे,
प्रतारणं जने जने, विहिंसनं पणे पणे ।
विलोक्य रोगदायकं विमिश्रणं कणे कणे,
गतास्मि यां शुचं हि, सा द्रुतं द्रुतं विलोप्यताम् ।।
अहं स्वतन्त्रता भणामि...... ।।

(११)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता ।
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः
सुपुष्टतां भजेत्कथं ? भवद्भिरेव कथ्यताम् ।।
अहं स्वतन्त्रता भणामि......।।

(१२)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपीडिता वसन्ति देशवासिनः ।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम् ।।
अहं स्वतन्त्रता भणामि......।।

(१३)

कथं पदातिमार्ग एव शेरते हि कार्मिकाः
कथं च धर्मनाम्नि सर्वमाचरन्ति धार्मिकाः ।
कथं च देहविक्रयो विधीयते सुयोजितम्
इदं निरीक्ष्य मानसे समीक्षणं विधीयताम् ।।
अहं स्वतन्त्रता भणामि......।।

जल नहीं मिले, सुरा मिले कदम कदम ।
शब्द मात्र रह गये हैं, भूल गये कर्म ।
भेद भाव हर तरफ बढ़ा है मीत जोर से ।
हो गये दुखी सुहृद्य स्वार्थ की हिलोर से ।
दूर जो इसे करे वही सुपथ चुनो ।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।९।।

एक दल से दूसरे में जाना बार-बार ।
लोक से प्रवंचना, ठगी और लूटमार ।
स्वास्थ्य शत्रु खाद्य वस्तु से भरे बजार ।
देखकर बड़ी दुःखी हुई हूँ दुराचार ।
शीघ्र दुख हरो मेरा, न अनसुनी करो ।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।१०।।

अग्रणी अयोग्यता, सुयोग्यता उदास है ।
चाटुकार वर्ग का सहर्ष अट्टहास है ।
यही दशा करोगे तो बनेगी बात ही नहीं ।
कब हँसेगी भोर, खत्म होगी रात ही नहीं ।
ऋद्धि कैसे आयेगी, रे सत्य तुम कहो ।
मैं स्वतन्त्रता तुम्हें पुकारतो सुनो ।।११।।

कहीं विलास वस्तुएँ आपार स्वप्न-लोक सीं
भारती-तती कहीं है मूर्तिमान शोकसी ।
कहीं है सपंदा सरित् समान बह रही अरे ।
पर अभाव है कहीं विपन्नता से जन भरे ।
दुर्दशा के मौन पक्षधर क्यों तुम बनो ? ।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।१२।।

कैसे रात पटरियों पे श्रमिक वर्ग सो रहा ।
क्या न धर्म-ओट में विचित्र कर्म हो रहा ।
किस तरह से रूप और देह का बजार है ।
शील, शौर्य, शान्ति का तीव्र तिरस्कार हैं ।
देखकर उदास हूँ, उठो मेरे जनो ।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।१३।।

(१४)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा।
विलोक्य किन्तु वर्तमाननेतृलाभकांक्षितां
व्रजान्यहं मुदं ह्यथो शुचं ? स्वयं विचार्यताम् ।।
अहं स्वतन्त्रता भणामि......।।

(१५)

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते।
समस्त धातवो मिलन्ति भारते प्रभारते।
उदेति या यदा-कदा तथापि बुद्धिहीनता
न सा कदाप्युदेतु येन तत्सदा विधीयताम् ।।
अहं स्वतन्त्रता भणामि......।।

(१६)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम्।
निजावलम्बनं जने जने सदा प्रवर्तताम्।
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम् ।।
अहं स्वतन्त्रता भणामि......।।

(आकाशवाणीतः २, ६, ११, १३, १४संख्यकानि पद्यानि न प्रसार्यन्त। इयं कविता इतः पूर्वम् अर्वाचीनसंस्कृतस्य पञ्चवर्षीये चतुर्थेऽङ्केऽपि प्रकाशिता बभूव किन्तु २, १३ संख्यके पद्ये तत्र न आस्ताम्। सम्पादकः)

जब अतीत की तपःपरम्परा विलोकती।
हो विभोर हर्ष-अश्रु किस तरह मैं रोकती।
किन्तु नेतृ वर्ग नित्य लाभलिप्त आज का।
कैसे हो भला कहो इस तरह समाज का।
अतीत से हँसू या आज रोऊँ तुम भनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१४॥

श्रम व धन से राष्ट्र का भण्डार है भरा।
समस्त धातुएँ लिए हुए वसुंधरा।
पर अभाग्य से कभी कुबुद्धि का उदय।
युग-युगों की चेतना का हो रहा है क्षय।
कभी न हो, कभी न, धीर देश के जनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१५॥

दरिद्र शक्तिहीन कोई राष्ट्र में नहीं रहे।
आत्म-मान-भंग हाय कोई भी नहीं सहे।
स्वावलम्ब से प्रदीप्त भाल देश का सदा।
प्रेम का प्रसार, ऐक्य भावना की सम्पदा।
व्यक्ति-व्यक्ति में हँसों प्रकाश-पाहुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१६॥

मा भव

(श्री मधुर शास्त्री, दिल्ली)

मा भव लीना,
त्वम् स्वाधीना।

दर्शय तद् रूपम्।
स्मारय भवभूपम्,

कथम् मलीना ?
भव स्वाधीना।

त्यागमयी वृत्तिः,
पर-सुखसंपत्तिः,

तया विहीना,
भज स्वाधीना।

दिनलुब्धा माता,
रजनी संजाता,

व्यथयति दीना,
मा स्वाधीना।

पश्चिम-परिणीता,
विस्मृत-नवगीता,

श्रुति - मतिहीना,
कुरु स्वाधीना।

अति मधुरा वाणी,
करुणा कल्याणी,

लुप्ता वीणा,
स्मर स्वाधीना।

देववाणी-परिषद्वार्ता

(१) २५.१०.१९८६ तारिकायां देववाणी-परिषदा कलिकातायाम् समायोजिते एकस्मिन् समारोहे प्रो० प्रभाकर नारायण कवठेकर-महाभागेन परिषत्प्रकाशितं श्रीत्रिगुणानन्दशुक्ललिखितं च 'अध्यात्मरामायण में अध्यात्म-चिन्तन' इत्याख्यं पुस्तकं समुन्मीलितम् । समारोहस्याध्यक्ष्यं जबलपुरस्थ-रानीदुर्गावतीविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षेण डा० कृष्णकान्त-चतुर्वेदमहाभागेन कृतम् । परिषद उपाध्यक्षेण डा० उमाकान्तशुक्लमहाभागेन विद्वद्भ्योऽभिनन्दनं व्याहृतम् महासचिवेन डा० रमाकान्त शुक्लेन च धन्यवादो ज्ञापितः । अस्मिन्नवसरे एका संस्कृतकाव्यगोष्ठ्यप्यायोज्यत यत्र डा० कवठेकर-डा० राजेन्द्र मिश्र-महाभागाभ्यां स्व रचनाः प्रस्तुताः । समारोहे उपस्थितेषु विद्वत्सु डा० कृष्णकान्त शुक्ल-डा० सत्यपाल नारंग-डा० चन्द्रकान्त शुक्ल-डा० कमलाकान्त मिश्र-श्रीबलदेवानन्द सागर-प्रभृतयः प्रमुखा आसन् ।

(२) ९.११.१९८६ ई० तारिकायां परिषदस्तत्त्वावधाने 'आर ६, वाणी विहार, नयी दिल्ली-११००५९ ई०' इत्येतत्स्थाने अमेरिकादेशस्य बोस्टननगरात् प्रतिनिवृत्तस्य संस्कृतकवेः श्रीश्रीसुन्दरराजमहाभागस्य सम्मानार्थमेका विद्वद्-गोष्ठी समायोजिता बभूव । परिषन्महासचिवेन डा० रमाकान्तशुक्लेन श्रीसुन्दरराजमहाभागस्य संस्कृतरचना अवलम्ब्याभिभाषितम् । श्री सुन्दरराज-महाभागेन काश्चन स्वनवीना रचना अपि श्राविताः । गोष्ठ्या आध्यक्ष्यं शास्त्रचूडामणिपण्डितेन पं० ज्वालाप्रसादगौड-महाभागेन सम्पादितम् ।

(३) देववाणी-परिषदः स्थापनायाः दशाब्दपूर्तिमालक्ष्य त्रिदिवसीयः कार्यक्रमः १३-१५.१२.१९८६ ई० तारिकासु नवदिल्यां वाणी-विहारे सम्पन्नः ।

प्रथमदिवसे १३.१२.१९८६ ई० तारिकायां परिषत्प्रकाशितग्रन्थाना प्रदर्शनी आयोज्यत या दिनत्रयं यावदागन्तुकानां कृते उद्घाटिता अतिष्ठत् । परिषदा अतीते समायोजितानां संस्कृत-कविसम्मेलन-नाट्य-समारोहादीनां वीडियोफिलमानां प्रदर्शनमप्यनुष्ठीयत ।

१४.१२.१९८६ ई० तारिकायां दिल्लीविश्वविद्यालयस्य वरिष्ठहिन्दी-प्राध्यापकस्य श्रीवेदप्रकाशगौतमस्याध्यक्ष्ये 'दृश्य श्रव्य संचार माध्यम और संस्कृत'-इत्येतद्विषये विचारगोष्ठी आयोज्यत । विषयं प्रवर्तयन् परिषन्महा-

सचिवः डा० रमाकान्त शुक्लो राष्ट्रैक्यस्य प्रबलपोषकस्य संस्कृतस्य समाचार-काव्य-नाटक-परिचर्चा-प्रभृतीनां कार्यक्रमाणाम् आकाशवाण्या इव दूरदर्शनतोऽपि प्रसारणं सविशेषमाचकांक्ष । गोष्ठ्यां श्रीबुधसिंहवर्मा, श्रीमुरलीधरखन्ना, श्रीआनन्दवर्धनशुक्लः श्री मदनलाल मेंहदीरत्ता, श्रीचन्द्रभानशर्मा अन्ये चानेके वक्तारः स्वविचारान् प्रकटयन्तः संस्कृतस्य कार्यक्रमाणां दृश्यसंचारमाध्यमेषु-द्रागेव समुचितं प्रसारणं राष्ट्रहिताय प्रत्यपीपदन् । गोष्ठ्यनन्तरं संस्कृतकवि-सम्मेलनस्य वीडियोफिल्मं प्रदर्शितमभूत् ।

१५.१२.१९८६ ई० तारिकायां त्रिदिवसीयस्य समारोहस्य समापन-गोष्ठ्यां डा० शास्त्रपुरं रामकृष्ण स्वामिनाथ-महाभागेन परिषत्प्रकाशितं डा० रामकिशोरमिश्रप्रणीतं 'श्रीगरुडध्वजसपादशतकं' समुन्मीलितम् । ग्रन्थस्य प्रथमं प्रतिरूपं राजस्थान-संस्कृत-अकादमी-सचिवेन श्रीराधेश्यामव्यासमहा-भागेन स्वीकृतम् । समारोहस्याध्यक्ष्यं कुर्वता राष्ट्रियसंस्कृतसंस्थाननिदेशकेन डा० मण्डनमिश्रमहाभागेन संस्कृतप्रचारार्थं स्वयंसेविसंस्कृतसंस्थानां भूमिका रेखांकिता । तेन स्वयंसेविसंस्थानां संरक्षणार्थं सर्वकारीयसाहाय्येन साकं समाजसेविनां प्रयासा अप्याकांक्षिताः । तेन संस्कृतस्य नूतनरचनानां पठनपाठनानुसन्धानार्थमपि शिक्षाविद आहूताः ।

(७) २०.१.१९८६ ई० तारिकायां परिषदस्तत्त्वावधाने समायोजिते एकस्मिन् समारोहे उज्जयिनीस्थ-विक्रमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण किञ्च सुप्रसिद्धसंस्कृतकविना आचार्यश्रीश्रीनिवासरथ-महाभागेन परिषत्प्रकाशितः पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य दर्शनविभागे प्राध्यापकस्य डा० केशवचन्द्रदाशमहाभागस्य 'निकषा' इत्यभिधानः संस्कृतोपन्यासः समुन्मीलितः । ग्रन्थस्य प्रथमं प्रतिरूपं स्वीकुर्वता परिषदध्यक्षेण आचार्यश्रीरमेशचन्द्रशुक्लमहाभागेन नूतनसंस्कृतरचनानां सम्यक् प्रचारस्य उपयोगिता रेखांकिता । अस्मिन्नवसरे आचार्यरथमहाभागेन अद्यत्वे प्रणीयमानस्य 'श्रीबलदेवचरित' नाम्नः स्वमहाकाव्यस्य केचन अंशा अपि श्राविताः । कविनाऽस्मिन् महाकाव्ये प्रसिद्ध-संस्कृतविदुष आचार्यश्रीबलदेवोपाध्यायस्य चरितं वर्ण्यते ।

संस्कृत-जगद्वार्ता

(१) १४.१०.१९८६ ई० तारिकायां दिल्लीविश्वविद्यालयस्य दक्षिण-परिसरे पुरीस्थ-लोकभाषाप्रचार-समितेः दिल्लीशाखायाः स्थापना जाता। अस्मिन्नवसरे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थाननिदेशकः डा०मण्डनमिश्र-महाभागः संस्कृतसम्भाषणशिविरप्रतिभागिभ्यः पुरस्कारान् प्रमाणपत्राणि च प्रदत्तवान्। समारोहस्याध्यक्ष्यं देववाणी-परिषन्महासचिवेन डा०रमाकान्तशुक्लेन कृतम्।

(२) नवदिल्ल्यां २१.१०.१९८६ ई० तारिकायां श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृतविद्यापीठस्य रजतमहोत्सवः केन्द्रीयमानवसंसाधनविकास-मन्त्रिणा श्री पी०वी०नरसिंहरावमहाभागेन समुद्घाटितः। तेन इन्दिरा गांधी-विशेषाङ्कोऽपि समुन्मीलितः। विद्यापीठप्राचार्येण डा० मण्डनमिश्रमहाभागेन विद्यापीठस्य विशिष्टाः कार्यकलापाः संसूचिताः।

(३) अखिलभारतीयप्राच्यविद्यासम्मेलनस्य त्रयस्त्रिंशत्तममधिवेशनं, कलिकातास्थ-'एशियाटिक सोसाइटी'-तत्त्वावधाने २४—२६.१०.१९८६ ई० तारिकासु कलिकातायां सम्पन्नम्।

कलिकातास्थे साल्टलेक-क्रीडाङ्गणे समायोजितस्यास्याधिवेशनस्यो-द्घाटनं पश्चिमबङ्गालमुख्यमन्त्रिणा श्रीज्योतिवसुमहाभागेन कृतम्। अधिवेशने नानोपभागोपवेशनेसु विद्वद्भिः शोधपत्राणि पठितानि। कलिकातास्थ-संस्कृत-साहित्य-परिषदा 'अभिज्ञानशाकुन्तलं' प्रयुक्तं, श्रीरञ्जनगांगुलिना सितारवादनं कृतम्, रवीन्द्रभारतीविश्वविद्यालयेन च श्रीरवीन्द्रनाथठाकुरविरचिता 'श्यामा' इतिनृत्यनाटिका प्रस्तुता। डा० रमाकान्तशुक्लस्य संयोजकत्वे एकं संस्कृत-कविसम्मेलनमायोजितमभूत् यत्र डा० दीपक घोष-डा० राजेन्द्र मिश्र-डा०मनोरमा तिवारी-डा० पुष्पा दीक्षित-डा० भगवतीलालपण्ड्या-श्रीकौशलेन्द्र पाण्डेय-श्री कृष्णनारायण पाण्डेय-प्रभृतिभिः कविभिः स्वरचनाः प्रस्तुताः।

सम्मेलनस्य कार्यसमित्या प्रो० रामचन्द्रनारायणदाण्डेकर-महाभागः आगा-मिनोऽधिवेशनस्य महाध्यक्षत्वेन सर्वसम्मत्या वृतः। अधिवेशनस्य समयेन संयोज-नार्थं स्थानीयसचिवः प्रो० जगन्नाथचक्रवर्ती-महाभागः सपरिकरः साधुवादानर्हति।

(४) ८-११-१९८६ ई० तारिकायां नवदिल्ल्यां भारतस्य महामहिमोप-राष्ट्रपतिः श्रीरामस्वामी वेंकटरामन्-महाभागः काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्यासंकाये साहित्यविद्याविभागाध्यक्षेण आचार्यरेवाप्रसादद्विवेदि-महाभागेन पुनःसम्पादितां 'कालिदासग्रन्थावलीं' लोकार्पितवान्। अस्मिन् समारोहे देशस्य नैके विद्वांस उपस्थिता आसन्।

(५) कालिदास-समारोहः—उज्जयिन्यां १२-१८ ११.१९८६ ई० तारिकासु विक्रमविश्वविद्यालयेन कालिदास-अकादेमी-मध्यप्रदेशशासनाभ्यां साकं कालिदाससमारोहः समायोज्यत। म०प्र० मुख्यमन्त्रिणः श्रीमोतीलाल-वोरामहाभागस्य सान्निध्ये समारोहस्योद्घाटनं महाराष्ट्रराज्यपालेन डा०शंकरदयालशर्ममहाभागेन कृतम्। कालिदाससमितेः सचिवेन आचार्य-श्रीनिवासरथमहाभागेन कालिदाससमारोहे समागतेभ्योऽतिथिभ्यः स्वागतं व्याहरता समारोहस्य ऐतिह्येन साकमागामिन्यः संकल्पनाः संकेतिताः।

सप्तदिवसीयेऽस्मिन् समारोहे शोधपत्रवाचनगोष्ठीत्रयम्, कालिदासकृतीनां पारस्परिकसमीक्षाम् अनुवादांश्चोद्दिश्य विचारगोष्ठीद्वयम्, श्रीमत्या कमलारत्नम्-महाभागायाः कालिदासजन्मस्थानमवलम्ब्य पं० सूर्यनारायण-व्याससमृतिव्याख्यानम्, डा०रमाकान्तशुक्लस्याध्यक्ष्ये किञ्च म० प्र० संस्कृत-अकादमीसचिवस्य डा०भास्कराचार्यत्रिपाठिमहाभागस्य सञ्चालकत्वे समकालीनविंशतिकवीनां काव्यपाठेन समृद्धः संस्कृतकविसमवायः, कविवर-डा० शिवमंगलसिंहसुमन-महाभागस्याध्यक्ष्ये सर्वभाषाकवि-समवायः, डा० वनेश्वरपाठकमहाभागस्याध्यक्ष्ये 'विद्वेषातङ्कविध्वंसप्रतिरोधाय निश्चितम्। भारतं प्रेरयत्येव कालिदासस्य भारती॥'-इति विषयमवलम्ब्य अन्तर्विश्वविद्या-लयीनसंस्कृतवाद-विवाद-प्रतियोगिता, श्रीबलदेवानन्दसागरमहाभागस्याध्यक्ष्ये अन्तर्महाविद्यालयीयश्लोकपाठ-प्रतियोगिता, डा० राजेन्द्रमिश्रमहाभागस्या-ध्यक्ष्ये अन्तर्महाविद्यालयीन-हिन्दीवादविवादप्रतियोगिता च आयोज्यन्त।

अनेके सांस्कृतिककार्यक्रमा अप्यायोज्यन्त; तद्यथा कु०डी० उमामाहेश्वरी-दलेन संस्कृतभाषायां हरिकथाशैल्यां, एथेन्सतः समायातेन 'वोलोस थियेटर ग्रुप'-नामधेयेन नाट्यदलेन ग्रीकनाट्यपरम्परायां, तिरुअनन्तपुरतः समायातेन 'सोपान' नाट्यदलेन च कूडियाट्टम्-शैल्याम् अभिज्ञानशाकुन्तलं प्रस्तुतम्, अहमदाबादतः समायातेन 'दर्पण अकादेमी'-दलेन मेघदूतं नृत्यनाटिकारूपेण प्रस्तुतम्, उज्जयिन्या 'उस्ताद कालूराम माच अखाड़ा'-इतिनाट्यदलेन मालव्यां माच-शैल्यां 'हास्यचूडामणि' नाटकं प्रस्तुतम्, भोपालस्थ-रंगमण्डल-कलाकारैः 'स्कन्दगुप्त' नाटकं प्रयुक्तम्, इम्फालतः समायातेन 'कोरस रेपर्टरी थियेटर'-दलेन मणिपुरीशैल्यां चक्रव्यूह-नाटकं प्रस्तुतम्, हैदराबादतः समायातया श्रीमत्या मालिनी राजूरकर-महाभागया शास्त्रीयगानं बम्बईतः समायातेन श्रीरघुनाथ-सेठमहाभागेन च वंशीवादनं प्रस्तुतम्।

अखिलभारतीयकालिदास चित्र-मूर्ति-कलाप्रदर्शन्यपि आयोजिता बभूव।

समापनसमारोहे मध्यप्रदेश-राज्यपालेन प्रो० चाण्डीमहाभागेन पुरस्कारा

वितीर्णाः। समारोहस्य सफलतार्थं कालिदाससमिति-सचिवः आचार्यश्रीनिवासरथ-कालिदासअकादमी-सञ्चालकडा०कमलेशदत्तत्रिपाठि - प्रभृतयः सर्वेऽपि आतिथेया आयोजका अभिनन्दनं साधुवादं चार्हन्ति।

(६) १७.११.८६ ई० तारिकायाम् उज्जयिन्यां विक्रमकीर्तिमन्दिरे संस्कृत-युवसमवायस्य पुरस्कारवितरणोत्सवः सम्पन्नः। संस्कृतयुवसमवायस्य सचिवेन श्रीशीतांशुरथमहाभागेन संस्थाया गतिविधयः संसूचिताः। वयोवृद्धा विदुषी श्रीमती कमला रत्नम् महाभागा विजेतृभ्यः पुरस्कारान् प्रादात्। कालिदास-अकादमी-सञ्चालकेन डा० कमलेशदत्त त्रिपाठि महाभागेन उज्जयिन्यां संस्कृत-भाषायाः संस्काराणां च समृद्ध्यै क्रियमाणा समवायस्य प्रयत्नाः आशंसिताः। समारोहस्याध्यक्ष्यं कुर्वता देववाणी-परिषदो महासचिवेन डा० रमाकान्त शुक्लेनोक्तं यद् भारतस्य अनितरसाधारणधनं संस्कृतं संरक्षितुं प्रचारयितुं च स्वयंसेविसंस्थाभिः महत्त्वपूर्णा भूमिका अनुष्ठीयते। तेन देववाणी-परित्प्रकाशिताः पञ्चसहस्ररूप्यक-मूल्यात्मकाः संस्कृतग्रन्थाः संस्कृतयुवसमवायाय उपहृताः।

(७) भारतीयज्ञानपीठेन 'भारतीय कविता १९८४' इत्येतच्छीर्षके ग्रन्थे पञ्चसंस्कृतकवीनाम् डा०रामकिशोरमिश्र - श्रीरंगनाथशर्म-डा० विन्ध्येश्वरीप्रसाद मिश्र-डा०उमाकान्त शुक्ल-डा० पुष्पा दीक्षित-महाभागानां संस्कृतकविताः हिन्द्यामनूद्य प्रकाशिताः। एतासु पञ्चकवितासु द्वे देववाणी-परिषत्प्रकाशितात् 'कूहा' 'सारस्वतसमुन्मेष'श्चेति काव्यद्वयात् अनुवादार्थं सञ्चिते। काव्यानुवादः प्रसिद्धहिन्दीगीतकारेण श्रीमधुरशास्त्रिणा कृतः। ग्रन्थस्य प्रकाशनं सद्य एव जातम्।

(८) हरियाणा-साहित्य-समित्या १९८६ तम वर्षाय निर्धारितः संस्कृतसाहित्य पुरस्कारः रोहतकस्थ-महर्षिदयानन्दविश्वविद्यालये संस्कृत-पालि-प्राकृत-विभागाध्यक्षाय डा० सुधीकान्तभारद्वाज-महाभागाय 'वयं के स्मः, इत्येतन्नाटकसंग्रह-रचनार्थं समर्पितः।

(९) आकाशवाण्या दिल्ली 'ख' केन्द्रेण १४-१२-१९८६ ई० तारिकायां 'साहित्यिकी' ति कार्यक्रमे श्रीमत्याः शशिप्रभा गोयल-महाभागाया 'अर्वाचीन-संस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः' इतीयं वार्ता डा० रमाकान्त-शुक्लस्य 'भारतजनताहम्' इतीयं कविता च प्रसारिते। संस्कृतकार्यक्रम-प्रसारणार्थं सयोजकः श्री गंगानाथचतुर्वेदी धन्यवादार्हः।

(१०) हावड़ा-संस्कृत-समाजेन स्वरजतजयन्तीं समालक्ष्य २७-२८.१२. १९८६ ई० तारिकयोः एकं संस्कृतसम्मेलनमायोजितम्। अस्मिन्ननुष्ठाने संस्कृत-कविसम्मेलनं, विचारगोष्ठ्यः शोधपत्रपाठगोष्ठ्यश्च समायोज्यन्त।

(११) संस्कृतसेवासंस्थानस्य द्वादशतमो वार्षिकसमारोहः दिल्ल्या रामलीलाप्राङ्गणस्थे श्रीराममन्दिरे ४.१.१९८७ तारिकायां सम्पन्नः। मुख्यातिथिना डा० मण्डनमिश्रमहाभागेन १४.१२.१९८६ तः ३.१.१९८७ यावत् संस्थानस्य तत्त्वावधाने प्रशिक्षितेभ्यः पौरोहित्य-कर्मकाण्डपण्डितेभ्य प्रमाणपत्राणि प्रदत्तानि। संस्थानस्य सचिवेन आचार्यरामदयालुशास्त्रिणा सूचितं यत् पञ्च प्रशिक्षणशिविरेषु अद्यावधि २२५ प्रशिक्षवः प्रशिक्षिता।

(१२) **त्रिदिवसीया संस्कृताभ्युसंगोष्ठी :** इलाहाबादविश्वविद्यालयशताब्दीसमारोहशृङ्खलायां समायोजिता त्रिदिवसीया संस्कृताभ्युदयसंगोष्ठी ९-११.१.१९८७ तारिकासु महता साफल्येन विश्वविद्यालयस्य सीनेटहॉलनाम्नि आस्थानमण्डपे सम्पन्ना जाता। ऐतिहासिकोऽयं महोत्सवो भव्यतमारम्भः प्रयागविश्वविद्यायलयीस्य शततमवर्षस्य। किञ्च देववाण्यात्मके संस्कृतक्षेत्रे समाचरितो महानव्यवसायोऽपि कश्चिद् वर्तते।

संगोष्ठीयं पञ्चसत्रेषु विभक्ताऽऽसीत् महोत्सवोद्घाटनं, कविसमवायः, संस्कृताभ्युदयः, शाकुन्तलमञ्चप्रस्तुतिः समापनञ्चेति। विंशतिप्राया लब्धप्रतिष्ठाः विपश्चित्तल्लजाः तावन्त एवं कवयः रंगकर्मिणः साहित्यकाराः शतमिताश्च प्रतिनिधयः स्वोपस्थित्या महोत्सवमिममलंचक्रुः।

शुक्रवासरे ९.१.८७ तारिकायां वेदमंत्रोच्चारणपरिपूते **'निनादय नवीनामये वाणि ! वीणाम्'** इति सरस्वतीस्तवननिनादिते सीनेटास्थानमण्डपे समारोहस्यास्योद्घाटनं कृतम् अवधविश्वविद्यालयकुलपतिना डा० अतुलचन्द्र वर्नाजिमहोदयेन। सभाध्यक्षपदं निर्व्यूढं प्रो० डा० विश्वनाथभट्टाचार्यवर्येण। सारस्वतसम्मानव्यतिकरेण महिमाऽस्य महोत्सवस्य द्विगुणितः। प्रयागविश्वविद्यालयीयसंस्कृतविदुषां बृहत्त्रयी (डा० आद्याप्रसादमिश्रः, पं० लक्ष्मीकान्तदीक्षितः डा० चण्डिकाप्रसादशुक्लश्चेति) प्रतिकुलपतिना डा० श्रीत्रिविक्रमपतिमहाभागेन साक्षतचन्दनमाल्योष्मप्रावारकं सादरमभिनन्दिता।

तस्मिन्नेव दिनेऽपराह्णे कविसमवायाख्ये द्वितीयसत्रे रसगर्भनिर्भरं हृदयावर्जकम् अभूतपूर्वञ्च संस्कृतकवितामृतवर्षणसौख्यमनुभूतं मध्येशालं निषण्णैरविषण्णैस्सहृदयैः। इयं कविगोष्ठी प्रतिकुलपतिभिः प्रो० त्रिविक्रमपतिभिः स्वोपज्ञसरस्वतीमहिम्नःस्तोत्रपाठेन समुद्घाटिता, डा० रेवाप्रसादद्विवेदिभिश्च स्वाध्यक्षतया सम्भूषिता। कविसमज्यां सञ्चालयामास मिश्रोऽभिराजराजेन्द्रः संस्कृताभ्युदयसंगोष्ठीसंयोजकः। डा० कमलेशदत्तत्रिपाठी (वाराणसीतः) प्रो० श्रीनिवासरथः (उज्जयिनीतः) डा० भास्कराचार्यत्रिपाठी (भोपालतः) डा० रमाकान्तशुक्लः (दिल्लीतः) डा० दीपकघोषः (कलिकातातः) डा० पुष्पा दीक्षिता (बिलासपुरतः) डा० नलिनी शुक्ला (कानपुरतः) डा० वीरभद्रमिश्रः

(लखनऊतः) डा० घनश्यामतिवारी (रायबरेलीतः) डा० प्रशस्यमित्रः (रायबरेलीतः) श्रीसुव्रतत्रिपाठी (एटातः), श्री जनार्दनप्रसादपाण्डेयः, डा० हरिदत्तशर्मा डा० चन्द्रभानुत्रिपाठी (प्रयागतः), डा० रेवाप्रसाद द्विवेदी (अध्यक्षः) डा० राजेन्द्रमिश्रश्च स्वललितललिताः कविताः श्रावितवन्तः। आकाशवाण्याः सेवानिवृत्तः संस्कृतकार्यक्रमनिष्पादकः (प्रोड्यूसरः) श्रीनर्मदेश्वरोपाध्यायः काव्यामृत प्रत्यक्षमास्वादयन् कविसमवायमिमं स्वजीवनस्यानुत्तमं श्रेष्ठञ्च काव्यानुभवं स्वीचकार।

१०.१.८७ तारिकायां पूर्वाह्णे संस्कृताभ्युदयनाम्नि तृतीये सत्रे संस्कृताभ्युदयविषयिणी परिचर्चा जाता। काशीविद्यापीठकुलपतिभूतेन डा० विद्यानिवासमिश्रमहाभागेन समुद्घाटिता डा० कमलेशदत्तत्रिपाठिमहाभागेनाध्यक्षत्वेन श्रीमण्डिता इयं परिचर्चा होराचतुष्टयं यावत् प्रावर्तत। आचार्यमानिकचन्द्रमिश्रः, पं० प्रभातशास्त्री (प्रयागतः) डा० विश्वम्भरनाथत्रिपाठी (गोरखपुरतः) प्रो० श्रीनिवासरथः (उज्जयिनीतः) डा० कृष्णकान्तचतुर्वेदी (जबलपुरतः) डा० रेवाप्रसादद्विवेदी (वाराणसीतः) च प्रमुखवक्तृरूपेण स्वविचारान् स्थापितवन्तः। परिचर्चान्ते च सर्वसमम्यत्याऽङ्गीकृतः प्रस्तावोऽप्येकः पारितो येन केन्द्रीयशासनं निवेद्यतेऽधिसंस्कृतं स्वदृष्टिकोणं परिवर्तयितुम्।

अस्मिन्नेव परिचर्चासत्रे प्रथमचरण एव संगोष्ठीसंयोजकेन डा० राजेन्द्रमिश्रमहाभागेन प्रणीतम् इलाहाबादविश्वविद्यालयजीवनयात्रानिरूपकं शताब्द्युत्सवस्मारकञ्च नूतनं काव्यं "शताब्दीकाव्यम्" डा० विद्यानिवासमिश्रमहोदयेन लोकार्पितम्।

महोत्सवस्य नैशे चतुर्थसत्रे कविकुलगुरुकालिदासविरचिता आकल्पमक्षतयौवना नाट्यकृतिः अभिज्ञानशाकुन्तलनाम्नी छात्रैरध्यापकैश्च मञ्चमुपनीयाभिनीता। सीनेटहालस्थैः पञ्चसहस्रप्रायैः छात्रदर्शकैः प्राध्यापकैः नागरजनैः पुरुषैर्महिलाभिश्च साभिरुचि नयनपाथेयीकृतमिदं नाट्यरसायन केषां तृप्तिं विस्मयं च न चक्रे? दर्शकाणामियतीं सख्यां विलोक्य सर्वेऽपि प्राघुणा आश्चर्यचकिताः सञ्जाता। डा० राजेन्द्रमिश्रस्य डा० राजलक्ष्म्याश्च समवेतनिर्देशने डा० हरिदत्तशर्मणा संयोजितं, डा हरिशंकरत्रिपाठिना च प्रस्तुतमिदं मञ्चनमद्यापि यथावसरं चर्च्यते दर्शकवृन्दैः। दिल्ल्याः देववाणीपरिषदो महासचिवेन डा० रमाकान्तशुक्लेन परिषत्पक्षतः सार्धद्विसहस्ररूप्यकमूल्यस्य पुस्तकानि नाट्यकलाकारेभ्यः पुरस्काररूपेण उपहृतानि।

११.१.१९८७ तारिकायां पञ्चमसत्रे समारोहसमापनं जातम् । अस्मिन् सत्रे सभाध्यक्ष आसीत् सागरविश्वविद्यालये संस्कृताध्यक्षः डा० राधावल्लभ-त्रिपाठिमहोदयः मुख्यातिथिश्चासीत् जबलपुरविश्व- विद्यालयसंस्कृतविभागा-ध्यक्षः डा०कृष्णकान्तचतुर्वेदमहोदयः । इलाहाबादविश्वविद्यालयकुलपतिः डा० रामेश्वरप्रसादमिश्रमहाभागः सर्वेभ्योऽभिनेतृभ्यः प्रमाणपत्राणि पारितोषिकाणि समुपायनानि च समर्पितवान् ।

इयं स्मरणीया संस्कृतोपकारकरणी सस्कृतसामर्थ्यदर्शिनी च संगोष्ठी कुलपतेः डा० रामेश्वरप्रसादमिश्रस्य संरक्षणे संस्कृतप्रवाचकेन लोकप्रियहिन्दीसंस्कृत-भोजपुरीकविनाऽभिराजडा०राजेन्द्रमिश्रेण संयोजिताऽऽसीत् । संगोष्ठीसमितेरन्ये सदस्याः आसन् प्रो० डा० सुरेशचन्दपाण्डेयः डा० सत्यनारायणश्रीवास्तवः पं० राजकुमारशुक्लः, डा० हरिशंकरत्रिपाठी डा० कु० राजलक्ष्मी वर्मा, डा० वीरेन्द्रकुमारसिंहः, डा० रुद्रकान्तमिश्रः, डा० हरिदत्तशर्मा, डा० शंकरदयाल-द्विवेदी, डा० मीता बनर्जी डा० साधना वेदी च ।

(१३) आकाशवाण्या भोपालनगरे रवीन्द्र-भवने २३.१.१९८७ ई० तारिकायां सर्वभाषाकविसम्मेलनं समायोजितम् यत्र देशस्य चतुर्दशभाषाणां मूलरचनाः तदनुवादाश्च कविभिः प्रस्तुताः । सर्वभाषाकविसम्मेलनस्य प्रारम्भः डा० रमाकान्तशुक्लस्य 'अहं स्वतन्त्रता भणामि' इत्येतया संस्कृतकवितयाभूत् यस्यानुवादः श्रीकृष्णमुरारिशर्मणा हिन्दीगीतमाध्यमेन प्रस्तुतः । कविसम्मेलनस्य सम्पादिता अंशाः आकाशवाण्याः समस्तकेन्द्रेभ्यः गणतन्त्रदिवसपूर्वसन्ध्यायां २५.१.१९८६ तारिकायां प्रसारिता जाताः । कार्यक्रमोऽयं डा० राजेन्द्रकुमार माहेश्वरी-महाभागेन निष्पादितः ।

(१४) **सप्तमविश्वसंस्कृतसम्मेलने अर्वाचीनसंस्कृतसाहित्ये कार्यशाला**— नीदरलैण्डदेशे लायदननगरे लायदनविश्वविद्यालयस्य 'कर्न इन्स्टीट्यूट' इति संस्थानस्य तत्त्वावधाने 'इन्टरनेशनल एसोसियेशन आफ संस्कृत स्टडीज' इत्येतया संस्थया २३—२९.८ १९८७ ई० तारिकासु समायोज्यमाने सप्तम-विश्वसंस्कृत-सम्मेलने अष्टादश विषयेषु कार्यशाला आयोज्यन्ते यत्र अर्वाचीन-संस्कृतसाहित्यमवलम्ब्याप्येका कार्यशाला आयोजयिष्यते यस्याः संयोजकोऽस्ति दिल्लीविश्वविद्यालयस्य संस्कृत-विभागाचार्यो डा०सत्यव्रतशास्त्रिमहाभागः । अन्ये भागग्रहीतारः सन्ति- डा०देवदत्त भट्टी, डा०रमाकान्त शुक्लः डा०श्रीमती उषा सत्यव्रतमहाभागा च । कार्यशाला सफला भूयादिति काम्यते ।

(प्रस्तोत्री—रमा शुक्ला)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू०एस०डालराः 10
आजीवनं (भारते) रु० 300 00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू०एस०डालराः १०
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू०एस० डालराः 100 00

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाक द्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस०डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **"देववाणी-परिषद्,-दिल्ली"** (Devavani Prishad, Delhi) इत्यंकितेन **'अर्वाचीनसंस्कृतम्'** (Arvacheenasasnkritam/*Arvācīnasaṃskṛtam*) इत्यंकितेन वा बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :

महासचिवः
देववाणी-परिषद्, दिल्ली
आर 6, वाणी विहारः, नई दिल्ली-110059 (भारतम्)

अथवा

सम्पादकः
अर्वाचीनसंस्कृतम्
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (९/१) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः २६.१.१९८७।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु० ६.००
२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०.००
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु० ४०.००
४. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०.००
५. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.००
६. आभाणकमञ्जरी („ „) रु० १५.००
७. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.००
८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु० ३०.००
९. „ „ „ (द्वितीय खण्डः) („) रु० ३०.००
१०. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.००
११. निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः) रु० २०.००
१२. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
१३. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.००
१४. संस्कृत साहित्य में राष्ट्रिय भावना
(डा० हरिनारायण दीक्षित) रु० १५०.००
१५. साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन
(डा० सुरेशचन्द्र शर्मा) रु० ५० ००
१६. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.००
१७. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० ५०.००
१८. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.००
१९. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.००
२०. सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.००
२१. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.००
२२. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
२३. सुरभिकाश्मीरम् („) („) रु० २०.००
२४. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.००
२५. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.००
२६. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २००।
२७. नियतिचक्रम् (ध्वनिनाटकम्) („ „) रु० २०.००
२८. श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्र) रु० १२.००
२९ लक्ष्मीशतकम् (डा० वरदराजकण्णन्) रु० २०.००
३०. अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल) रु० [illegible]०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष ५५३४६९